हकत्वविशिष्टवह्नित्वेप्रतियोगितावच्छेदकत्वबुद्धौविरोधित्वात् नहिसंभवतिप्रमेयत्वादेर्धूमेव्याप्यकत्वग्रहेप्रमेय
धूमोनास्तीतिप्रतीत्याधूमत्वनिष्ठायांप्रतियोगितावच्छेदकतायांसामानाधिकरण्येनप्रमेयत्वावच्छिन्नत्वस्यधूमवृत्तौ
प्रतियोगितायांप्रमेयत्वधूमत्वोभयावच्छिन्नत्वस्यसंसर्गमर्यादयावगाहनंव्यवहारसिद्ध चतथाविधबुद्ध्यवव्यावर्त्तकत्व

मितिः स्यात् तद्धाहार्यभिन्नतादृशज्ञानत्वेन शाब्दबोधेच्छाया अवकारणत्वाभावात् तादृशस्थले अनुमितिमात्रसामग्रीस
त्त्वेन शाब्दबोधादिप्रसंगविरहेण तादृशाकारणत्वकल्पकाभावात् इति तत्तद्धाहार्यज्ञानभिन्नतादृशज्ञानत्वेन कारणत्वौ
तकल्पनमावश्यकमिति चेत् अत्र तादृशाहार्यज्ञानमात्रेपि तादृशानुमितिविषयत्वेति अनायत्या तद्धाहार्यभिन्नज्ञानस्य
त ण कारतान्यतंत्रैयैवेति वस्तुगतिः। उपाध्यायानुयायिनस्तु कल्पनान्नाथवोपनीतं नानुमितौ विषयः। किन्तु तदुद्दीयमान
मज्ञाने तथाहि यत्र महानसीयवन्ह्यनुमितिजनिकायां सामग्र्यां सत्यां महानसीयवह्निमंशे ज्ञापवनमितिनिश्चयस्तत्र म
हानसीयवह्निमानित्येवानुमितिः एवं यत्र अभ्रवान्हित्वावच्छेदेन दाहकत्वावगाही वह्निव्याप्यधूमवान्पर्वत इति प रामः
रामर्शस्तत्र वह्निमान् पर्वत इत्येवानुमितिः। उदीच्यास्तुयंज्ञपवनमहानसीयवह्निमान्दाहकवह्निमान्पर्वत इत्यादि २६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDE

यो ञ्जनविरहात् संयोगादौ व्यभिचारवारणाय प्रयोज्यमविषयत्वञ्जातिरूपनायकतावच्छेदकतया सिध्यति तत्रांतर्भा
वः शाब्दत्वांतर्भावेण व्यञ्जनाऽपवनं वह्निरित्याकारकेच्छायां तादृशज्ञानानुकारणत्वांतरकल्पनप्रसंगात् अंजनपवनत्वाभा
वान् वह्न्यभावगोचरत्वेयेन विनश्यद्वस्थापि तत्साधनताज्ञानोत्पादि तेन व्यंजनपवनत्वाभाव कुर्वीच्छाअनुदयेन समान
विषयके च्छासामान्ये तथा विधज्ञानापेक्षया सर्वतंत्रसिद्धायास्पदृष्टनिकटत्वतद्धत्वाद्विध्यतेच द्वेषयोर्निविषयात तथा
तद्वाहार्यव्यक्तिलयोग्यता ज्ञानकारणतये वज्ञाघकस्य सह कारिसकलमप्यनुमितिजनकज्ञानमात्रान्तामिति नातिरिक्त
कारणताकल्पनं ननु तथापि यत्र वह्निव्याप्यवान्महानसीयेन त्वं वह्न्यभाववान् पर्वतो व्यप्यच्चसर्वो वह्निमान्महानसीयत्व स
वह्निपर्य्याञ्जनमितिनिश्चयस्तदा यद्याहार्यवह्निन व्यंजनपवनमितिज्ञानं ततो व्यंजनपवनम्महानसीयवह्निमानित्यनु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वेनंतकतरानंतकारणताकल्पनप्रसंगात् प्रत्येकमेव तेषामनेककारणतात्यावच्छेदकत्वमभ्युपेयं तत्रदाहार्यव्यक्तिभे
दविशिष्टयोग्यताज्ञानानां परस्परसहकारित्वाभ्युपगमेननैकस्मादाहार्याद्दाहार्यांतरभिन्नाद्योग्यताज्ञानाच्छाब्द
प्रसंगस्तद्दाहार्यव्यक्तिभिन्नयोग्यताज्ञानाभावात् यत्रचैकस्मिन्नाहार्यज्ञानद्वयमेकदाप्रवर्तितिष्ठते तत्रव्यक्तिद्वय
भेदप्रवेशेनैकैककारणताकल्पनमपितु न तथाविधां क्षतिमावहतिभवतु वा तत्रप्रथमाहार्यव्यक्तेः प्रतिबंधकतैवाद्विती
याहार्यव्यक्तिभिन्नस्यचयोग्यताज्ञानस्यकारणतातेवत्तीयक्षणोत्पन्नाद्दाहार्ययोग्यताज्ञानाच्छाब्दबोधानुपप
त्तिः एवंचयद्दाहार्यज्ञानव्यक्त्यनंतरं नाभिमधिमविषयकंतज्ज्ञानभिन्नयोग्यताज्ञानत्वेनकारणतायांयोग्यताज्ञा राम
नाव्यवहितोत्तरोत्पत्तिकत्वमेवजन्यतावच्छेदकं न तु तत्राहार्य्यव्यक्तिभेदस्यापि योग्यताज्ञानविशेषणतया प्रवेशः प्र २५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतियोगिताकस्तदभावः कालानवच्छिन्नविशेषणतयायोग्यताज्ञानेविशेषणीभूतजन्यतावच्छेदकेकोटौनिविसनइतिचेन्नहित्व
प्रामाण्यज्ञानस्थितिकालस्योत्पद्यततन्मात्रकालेति· प्रतियोग्यताज्ञानेनजातितस्यशाब्दबोधस्यासंग्रहः अप्रामाण्यज्ञा
नानधिकरणंयः स्वाधिकरणक्षणअप्रामाण्यज्ञानाभावविशिष्टस्यस्वस्याधिकरणंवायः क्षणः तदव्यवहितोत्तरोत्पत्तिकत्वं
तुअप्रामाण्यंतराप्रामाण्यज्ञानाभावस्यसर्वत्रक्षणेसंभवात्ः प्रथमक्षणसंभवी द्वितीयप्रामाण्यज्ञानास्यघयोग्यताज्ञानात्तृतीय
क्षणोत्पन्नशाब्दबुद्धेरनुपग्राहीनेत्यपिपरास्तं· अप्रामाण्यज्ञानाभावस्यपृथगेवजनकत्वाभ्युपगमात्ः एवमहार्य्यबुद्धीनां
तत्समानकालीनगुणांतरस्यवाप्रतिबंधकत्वमपिव्याख्यातं· वस्तुतस्तु· आहार्य्यभिन्नानांमध्येत्याभावानयोगवपक्षेनावच्छे
दकाः अवच्छेदकताप्यमितिरूपपत्तिविरोधादेकविशिष्टापरस्य· तथात्वेपरस्परविशेष्यविशेषणतावैतिनिगमकाभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न

तु॰ नन्वेवं वह्नित्वावच्छेदेन गृह्यमाणप्रमेयत्वादिरपि वह्न्यादिसाध्यकानुमितावुपनीतो कथं न भासत इति चेत् । उच्यते यद्ध
र्मावच्छेदेन व्यापकत्वाग्रहस्तद्धर्मसामानाधिकरण्येन तथाविधनिश्चयाभावस्य जनकत्वसंभवात् । ज्ञानविशेषस्यैव तस्य स
हकारित्वोपगमाद्वा नातिप्रसंगः । एतेन यत्र व्यंजनपवनत्वाभावप्रकारतात्वावच्छेदेन व्यंजनपवनविशेष्यतानिरूपक
त्वावगाहि प्रथमम् अप्रामाण्यज्ञानं ततो व्यंजनपवनत्वाभावप्रकारकं तद्विशेष्यकं च योग्यताज्ञानं तदनन्तरोत्पन्ने शाब्दबोधे
तादृशाप्रामाण्यज्ञानाभावविशिष्टतत्प्रकारकयोग्यताज्ञानकारणतायां व्यभिचारः । द्वितीयक्षणावच्छेदेनाप्रामाण्य
ज्ञानाभावोपलक्षितस्य तस्य योग्यताज्ञानस्याव्यवहितोत्तरद्वितीयक्षणे जायमानत्वात् । तदव्यवहितपूर्वक्षणे वाप्रामा रामः
ण्यज्ञानाभावविशिष्टयोग्यताज्ञानाभावात् । अथ यावत्सत्त्वप्रामाण्यज्ञानाभावः सामानाधिकरण्यसंसर्गावच्छिन्न २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्स्वरूपं सदेव कल्पनालाघवोपक्षाणिमलौकिककर्त्तृत्वसामानाधिकरण्येनाक्षितिकर्त्तृभेदकल्पनायां सत्यामलौकिककर्त्तृ
त्वावच्छेदेन क्षितिकर्त्तृतादात्म्यस्यग्रहणायोगात् एवं च प्रकृते प्रसिद्धजातीतरानिरुक्तान्यतरत्वावच्छेदेन तादृशजात्यभाव
त्वस्याग्रहात् तादृशजात्यभावत्वव्यप्रसिद्धजातीतरानिरुक्तान्यतरत्वविशिष्टविधेयताकानुमितिजायमानाप्रतिरूपणाद्विक
र्द्धूपत्वासिद्धं कल्पनालाघवेन तत्तद्धर्मान्यपनये जन्यमाने तत्तद्धर्मे गौरवान्तरस्य सहाभावोपि सहकारीति प्रतिपादितं प्राकृतेन
गंधसमवाय्यकारणतावच्छेदकतानिरूपकत्वसंसर्गेण धर्मवत्ताश्रवच्छेद्यत्वात् इत्यनुमाने प्रसिद्धजात्यवच्छेद्यत्वा
धेयाभिचारित्वधर्माविच्छेद्यानुवाध्यमानप्रसिद्धजातीतराव्यभिचरितधर्मत्वस्वरूपं यावद्विधेयतावच्छेदकं तदवच्छेदे
नतावद्व्योहात्पतमत्वनिर्णयेसत्यपिनतावद्व्योहान्यतमत्वावच्छिन्नत्वंसिद्ध्यतितावन्यतमत्वावच्छेदेन बहुत्वगौरवग्रह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देन कर्त्तृत्वप्रकारकोपस्थितिबलात् क्षितिकर्त्तृकक्षितिरित्याकारा(?)मानाद् अनुमितिविशेष्यविशेषणतयाव्यापकतानवच्छेदक
कमपि क्षितिकर्त्तृत्वं रूपादि – न चैवं तत्त्वस्य कर्तुरेवाध्यवसायेन सिद्ध्यतिपरमार्थस्तु पर्यवसितविधेयतावच्छेदकावच्छेदे
नयोधर्मोगृहीतः स धर्मस्तेनैव कल्पनात्साध्यवेनास्वरूपस्तत्तोपनीतो विधेयविशेषणतयाभासते घटत्वकादिपक्ष
कर्तृत्वमानेवलौकिकस्य कर्त्तृधात्(?) अलौकिककर्त्तृत्वमेव पर्यवसितविधेयतावच्छेदकं तदवच्छेदे सत्त्वक्षितिकर्त्तृत्वरूप
हीतामिति क्षितिकर्त्तृत्ववदलौकिककर्त्तृकं – कमित्यनुमितिरुत्पद्यते तत्रचालौकिककर्त्ता क्षितिकर्त्तेति कल्पना
विशेषणतावच्छेदकप्रकारकानिश्चयत्वेनाववत्त्वप्रकारणाभावात् कर्तृव्याप्यवत्ता परामर्शलौकिककर्त्तृवाधश्च रामः
टिताऽनुमितिसामग्र्यानिवेशात्ते अलौकिककर्त्तरि क्षितिकर्त्तृभिन्नत्वप्रकारकल्पनाविशयत्वाभावस्तत्रूपंगौरवं २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकार इति स्पष्टमुपनिबद्धं तत्र वस्तुतस्तु तादृशज्ञानाभाववत्त्वसामानाधिकरण्येन पर्यवसितसाध्यतावच्छेदकप्रसिद्ध्याभिन्न
निरुक्तान्यतरत्वप्रकारकोपस्थितिः स्वरूपसत्त्वेन तादृशज्ञानाभाववत्त्वस्योपनायकं कल्पनालाघवमनुगतस्वरूपव
सायेन तदुभयाप्यतानां तरेण वा तत्तादृशप्रत्युपस्थिते गौरवात् कल्पनागौरवं स्वरूपसन्त्येव ज्ञातित्वावच्छेदेन पर्यवसि
तसाध्यतावच्छेदकप्रकारकोपस्थितौ विधितता द्विरुक्तधर्मावच्छेदेन सधर्मो विधेयविशेषणतया कनीभूतानु
मितौ विषय इति सामान्यव्युत्पत्तिस्त्वेवं वह्न्यादिसाध्यकस्थले पर्वतीयेतरत्वसामानाधिकरण्येन वह्नित्वप्रकारक
कोपस्थितौ सत्यामसत्यां च पर्वतीयत्वाद्यवच्छेदेन पर्वतः पर्वतीयेतरवह्निमानित्यनुमितिः स्यादिति चेन्न कथमस्या
पत्तिर्बाधो न विरुणद्धि अत एव क्षितिपक्षकानुमाने तत्कर्तृसिद्धेस्सकपक्षकानुमाने साध्यमाने क्षितिकर्तृत्वावच्छे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नप्रतिसंहितं स्यात् तत्प्रतिसंधानेऽतुल्लाघवेन तदभेदस्य गौरवत्वेन तद्भेदः साधनाऽं इव इत्स विनिगमस्यावर्त्तेति· अथ जातित्वा
वच्छिन्नभेदेऽपि शरीरत्वलाघवमिव वक्रुत्वगौरवमपि प्रतिसंहितमिति चेत् · पर्यवसितविधेयतावच्छेदकधर्मविशिष्ट
धर्मावच्छेदेन वक्रुत्वगौरवप्रतिसंधानं तद्भेदतद्वृत्तित्वादेरेव विधेयविशेषणतयाभासते जातिवृत्तौ तु प्रसिद्ध
जातिभिन्नधर्मत्वादिरपि तरवाधवशात्पर्यवसितविधेयतावच्छेदकतद्विशिष्टजातित्वावच्छेदेन वक्रुत्वगौरवज्ञा
नं नास्तीति कथं धर्मे जातिभिन्नत्वमवच्छेदकतायां जात्यवृत्तित्वं वाभासेत अपो हेतु प्रसिद्धजातिभिन्नधर्मत्वाविशिष्टा
पोहत्वावच्छेदेन वक्रुत्वं गृहीतमिति महाबुद्धस्य तस्मात्तदीन्द्रियजात्यभावत्वावच्छेदेन प्रसिद्धजातिभिन्नता इत्यादा राम·
ति तद्भावान्यतरत्वप्रकारककल्पनाविविषयत्वेमेव लाघवं तूक्त्वातीन्द्रियजात्यभाववत्त्वं दशान्यतरत्ववानिति व्यवस्था २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घुनाद्रव्यत्वेनैव स्पंदसमवायिकारणतावच्छेदकात् गगनादौ स्पंदोत्पत्तिप्रसंगस्य कारणांतराभावेनैव निवारणात् कारणताव
च्छेदकतैव जातिसिद्धिर्यन्नि तत्रान्यशरीराणां समानियतानामनतिप्रसंजकानां वहूनामुपाधीनामवच्छेदकप्रसंभवात् क्लृप्तत्व
लाघवमिन एवविधेयतावच्छेदकावनीय इति व्याप्तत्वमेकत्वमात्रेनावतिष्ठते यथा गंधसमवायिकारणत्वानतिप्रसंजकानामु
पाधीनां तावद्भिन्नत्वतावदवृत्तिभूत्यत्वादीनां नैकतमात्रे क्लृप्तलाघवमिवतिष्ठत इति शरीरलाघवात् पृथिवीत्वजातिसि
द्धिः। ननु तत्रापि गंधसमवायिकारणताप्रसिद्धि जातिभिरनवच्छिन्नधर्मानवच्छिन्नत्वगाहकेन प्रमाणेन नानाविधात्वात्
वच्छेदेनापोहेत प्रसिद्धि जातिभिन्नानतिप्रसंजकधर्मव्याप्तकल्पनालाघवप्रतिसंधानसहकारेणावच्छेदकतायामा
ह वृत्तित्वधर्मे वायोरभेदः कथं न भासत इति चेत् कथं न भासेत यथा घपोहत्वावच्छेदेन क्लृप्तत्वलाघवमिव बहुत्वगौरवमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्य धर्मस्तत्रापि तदवच्छेदकलाघवेनोपनीतधर्मविषयत्वं तज्ज्ञानत्वावच्छेदेन गृह्यते अन्वयव्यवसायेनानन्वयानुमितित्वा-
वच्छेदेन अत एव लाघवोपनीतधर्म्मगोचरानुमितिमानसं न वेत्यत्र विविदंते अन्यथा प्रत्यक्षप्रमाणसिद्धेरनुमितेर्लघु
धर्मोपहितविधेयविषयत्वे विवादासंभवात् कल्पनागौरवपरिहृत्य गुरुभेदोपनायकोनवा तद्भेदस्य हेतुप्रतिबंधक इति
वस्तुतस्तु कृप्तत्वलाघवरूपार्थ्यं तयोः आवृत्तं सदवच्छिन्नपरिमाणवत्वेनावतिष्ठते अतः पृथिव्याद्यन्यतमत्यादेर
कृप्तस्य ताहृशोपाधेः संभवात् यदि च शरीरगौरवादिनिरासवशात् पृथिव्याद्यन्यतमभेदोपि धर्मविशेषणीभूय भाव
यं समुदितमादाय विशेष्यविषयतावच्छेदकावनी तैरप्याप्तमितं कृप्तत्वात् लाघवज्ञानमित्युच्यते तदा तदभिप्रेत्यैवमुक्तं रामः
त्वंजातिसाधनमन्यंते तार्किकाः आत्मा शरीरत्वलाघवस्योपाधौ कल्पना लाघवस्य च इत्यथातः शरीरत्वतः कल्पनातश्चानल २९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वेन बोधितात्वाच्च· अतो जातिभेदादिग्राहकाभावान्निराबाधेन शरीरलाघवेन जात्यभेदादिरुपनीयते· अवच्छिन्नपरिमाण
वत्त्वादिभेदग्राहकेण शरीरयोरवेणास्कंदितस्तु कल्पनालाघवं सदर्पितदभेदं न साधयति· संभवति च तत्कारणतावच्छेदक
धर्मे शरीरलाघवोपनीत जात्यभेदग्राहकसामग्रीसमवहित अवच्छिन्नपरिमाणवत्त्वे शरीरयोरवग्रहरूपतादात्म्यसंसर्ग
वच्छिन्नपरिमाणवत्त्ववृत्तिप्रकारत्वं तन्निरूपितविशेष्यत्वेनाभिन्नं वा यद्धर्मनिष्ठमवच्छिन्नपरिमाणवत्त्वतादात्म्यसंसर्गा
वच्छिन्नसंबन्धावच्छेदकत्वं तन्निरूपितावच्छेदकत्वविधेयतानिरूपितप्रकारतोद्देश्यताकानुमिति· मितित्वं प्रतिबध्यता
वच्छेदकं· यदि पुनरवच्छिन्नपरिमाणत्वाभिन्नधर्मावच्छिन्ना च व्याप्यतायाः परामर्शस्तत्र धर्मनिष्ठाधेयतावच्छेदक
ताऽवच्छिन्नपरिमाणवत्त्वतादात्म्यावच्छिन्ना· ननु यत्र लाघवोपनीतस्य धर्मस्तत्रार्पितस्वावच्छेदकलाघवोपनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वच्छिन्नपरिमाणत्वभेदं च विषयीकरोति· तच्चानुपपन्नं· तथाहि· प्रसिद्धजातीतरधर्मत्वेनावच्छिद्यमानायां तदवच्छेद
कविशिष्टादेवावच्छिन्नपरिमाणत्वान्तरस्याग्रावृत्तमानत्वस्य त्वलाघवमवच्छिन्नपरिमाणवत्त्वेऽगृहीतमनुसंहितं
च· ज्ञातयोन प्रसिद्धजातीरितेन्त्वेन हृत्वाद्यतिर्गोरवमतो ज्ञानवृत्तित्वमवच्छिन्नपरिमाणवत्त्ववृत्तित्वं च भासता
मप्यवाधर्मेजातिभिन्नत्वावच्छिन्नपरिमाणवत्त्वावच्छिन्नभिन्नत्वोसिद्धेतामातिसत्प्रतिपक्षवत्कथं विनिर्गम
कं· नहितयोर्गोरवघटितसामग्र्यावन्यतरस्यवनावनमनुपस्थापामइतिचेत्· अत्राहुः। कल्पनागोरवमहः स्वधर्मि
तावच्छेदकावच्छिन्नभेदमपनात्रायतीत्यत्रविनिगमकाभावः पर्यवसितसाध्यतावच्छेदककल्पनासामान्याभा रामः
वस्ययोग्यप्रतियोगिकत्वेनायोग्यतयादुर्ग्रहत्वात्· अंततोऽन्यथाख्यातिस्वरूपायाअपिताद्दशाकल्पनायाः सर्वत्रसं २०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवात्· एकतरमात्रपरिकल्पनेविनिगमकवितायांकल्पनालाघवस्योपयोगः। अतएवप्रसिद्धबीजत्वजात्यैवांकुरकारणत्वाव
च्छेदेनतुशरीरगुणानांशाघ्यतमत्वेनवाकल्पनागुणात्कुर्वद्रूपत्वेन· नन्वेवमपिकारणतावच्छेदकत्वेनाएवंजातिसिद्धिरितिप्रा
माणिकानांप्रवादः कथमुपपद्यते· तथाहि कुर्वद्रूपत्वावच्छिन्नजन्यतानिरूपितजनकतानिरूपकतयाधर्मवृत्त्यवच्छेद
कतावतिकारणत्वादितिसामान्यतोदृष्टावतारेप्रसिद्धजातीनांगुणत्वपृथिवीत्वद्रव्यत्वादीनांविरोधव्यतिरेकव्यभिचारान्वय
व्यभिचारप्रयोजकत्वप्रतिसंधानात्प्रसिद्धवत्यनवच्छिन्नत्वेसिद्धेप्रसिद्धजातीतरधर्मविच्छिन्नत्वानुमितिजायमानाजातेप्र
कारिताद्यरहितत्वानप्रकारत्वस्वरूपशरीरलाघवमवच्छिन्नपरिमाणवत्त्वादौतद्विपरीतंगौरवमवगाहनस्यज्ञानस्यब
लातः अवच्छेदकत्वाविशेषणतयाअवच्छिन्नपरिमाणवृत्तित्वंजातिवृत्तित्वंचावगाहते· अथवाविशेषणेधर्मेसत्यभेदम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वंप्रतिसंहितमितिजात्यभेदोविधेयधर्मेभासतामित्यविनिगमस्त्वात्रवर्त्तते· अथजातित्वावच्छेदेनशरीरलाघवमिवपर्यवसितवि
धेयतावच्छेदकप्रकारककल्पनाविषयत्वाभावरूपंगौरवमपिप्रतिसंहितमितितदुद्भासकसामग्रीसमाजान्नतदभेदोभा
सतइतिचेत्· एवंसतिताद्दशजात्यभावेकल्पनालाघवमिवशरीरगौरवप्रतिसंहितमितितदुद्भासकसत्वात्तदभेदोपिसासि
ध्येति·मेवं·शरीरलाघवस्यावच्छेदकत्वादिविशेषणतयैवलघुधर्मोपिनायकत्वात्· संभवतिलघौगुरौधान्यवच्छेदकत्वादीनि
नाभ्युपेयन्तेतेष्वेवशरीरलाघवस्याविनिगमकत्वात्· एकत्रधर्मिणिशरीरतोगुरुरूपयोरुभयोरपिसमावेशादर्शनात्· धर्मि
णिधर्मसंसर्गानुमानेशरीरलाघवस्याकिंचित्करत्वात्· कल्पनालाघवस्तुपरस्परविरोधिनामेकतमासिद्धौविनिगमकं रामः
विघतेन्वप्रकृतेएकत्रधर्मिणिवीजेताद्दशजातिवद्भावयोरेकस्यामवच्छेदकतायांवद्वयोर्धर्मयोस्समावेशासमावेशासं १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि

विघ्नते। हि प्रकृते प्रसिद्धतादृशजातीतरनिरूपितान्यतरत्वावच्छिन्नानुमितिरितरतरबाधघटितासामग्रीविधेयतावच्छेदकांतरधर्मतादृशजात्य भाववत्त्वस्याधिकवलेन कल्पत्वलाघवस्यानंतादृशजात्यभिन्नप्रसिद्धतादृशजातीतरनिरूपितान्यतरत्वावच्छेदेन कल्पनत्वलाघव प्रतिसंधानभावश्चेतिप्रसिद्धतादृशजातीतरतादृशजात्यभाववत्त्ववच्छ्रयाधीजत्वान्यंकुरजनकतावच्छेदकजातितदभा वान्यतरत्वद्धीजभिन्नानुमितिरुत्पद्यमानप्रतिरूणाद्धिकुर्वद्रूपत्वसिद्धं· वस्तुतस्तु प्रकृते कल्पज्ञातीतरवत्त्वविशिष्टस्य तादृशान्यतरत्वं तदेवपर्यवसितंविधेयतावच्छेदकंतत्प्रकारककल्पनाविषयत्वंचकुत्रापिजात्यभावभिन्नेगुणत्व त्वादिजातौनगृहीतं· यत्र तु साध्यतावच्छेदकप्रकारककल्पनाविषयत्वंतु तादृशजातितदभावोभयसाध्यव त्वेनगृहीतमितिनविनिगमकं· ननु तथापि तादृशजात्यभावो कल्पनालाघवमिवजातित्वावच्छेदेनशरीरलाघ

शुद्धव्यापकतावच्छेदकधर्मावच्छिन्नविधेयताकानुमितौप्रतिवंधकत्वंवाच्यंइत्यपूर्वकल्पनंविघ्नतेहि तत्रशुद्धसाध्यानुमि
तिप्रयोजिकापक्षता · किंच · सतीतरबाधेशुद्धसिद्धेवभिन्नविषयकप्रत्यक्षादेरनुत्पादप्रसंगः तत्रेष्टापत्तौइतरबाधाविशि
ष्टशुद्धपरामर्शविशिष्टसिद्ध्यभावादिघटितायाः सामग्र्याभिन्नविषयकप्रत्यक्षादेःप्रतिवंधकताविरहं · अन्यथाशुद्धपराम
र्शस्यशुद्धसिद्ध्यभावविशिष्टत्वेनप्रतिवंधकतयातदभावेनभिन्नविषयकप्रत्यक्षोत्पत्तौबाधकाभावइतिचेत् · मैवं · तथा
यस्तुसमूहालंबनात्मकपरामर्शजन्यानुमिति तदितरबाधजन्यानुमितिरपिविधेयतावच्छेदकशालिनातथापितद्धर्मावच्छि
न्नविधेयताकानुमितिसामग्रीसहकृतंतद्धर्मांतरधर्मावच्छेदेनलाघवज्ञानंतद्धर्मांतरधर्मरहितेताविधेयतावच्छेदकध रामः
र्मवतितद्धर्मलाघवज्ञानाभावसहकारिणासौभौघतद्धर्मांतरधर्मविधेयनिरोधणतयाग्राहयतीतिपरिभाषानविरुध्यते १८

ऽवगाहते । जातेस्तु प्रसिद्धजातीतरजात्यन्यतरत्वेन व्यापिकल्पनाऽगृहीतेति न जात्यभेदसिद्धिः । नान्वितरबाधोपनीतधर्मवि
शिष्टव्यापकतावच्छेदकधर्मावच्छिन्नविधेयताकानुमितौ जायमानायां शुद्धव्यापकतावच्छेदकधर्मेण तद्विधेयताम
वच्छिद्यते न वा । आद्ये सामान्येन बाधितमपि साधयेत । अनुमितिस्तथा च तद्विधेयतावच्छेदकधर्मविलीढादितरस्मा
द्व्यावृत्तं लाघवं यद्धर्मावच्छेदेन प्रतिसंधीयते स एव धर्मो विधेयविशेषणतया भासत इति व्युत्पत्तेः । निरुक्तान्यतरत्वप्र
त्यभावत्वं कथं भासेते । न हि लघुत्वलाघवं तदनुमितिविधेयतावच्छेदकनिरुक्तान्यतरत्वावलीढाया गुरुतरजातेर्वा
वृत्तं मन्निरुक्तजात्यभावत्वावच्छेदेनावतिष्ठते । कथमन्यथा वह्नित्वावच्छिन्नव्यापकतावगाहिपरामर्शाज्जनितायाम
मनुमितौ तार्णत्वादिकल्पनालाघवेनोपनीतं न भासते । तार्णोऽपि वह्निरिति प्रतिसंधानसंभवात् । द्वितीयेऽपीतरबाधस्यैव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुवचं शरीरगौरवत्वाद्दिकल्पनागौरवं तु कथं तदभावं साधयति । नहि कुर्वद्रूपत्वं कल्पनातोऽपि विप्रतिसंधीयते धर्मिणि
एवाप्रसिद्धेः । न च कल्पनागौरवं नाम किञ्चिदनुगतः पदार्थो निर्वक्तुं शक्यत इति पूर्वपक्षः । उच्यते वस्तु पर्यवसितवि
धेयतावच्छेदकप्रकारककल्पनाविषयत्वमेव लाघवं तत्त्वं यद्धर्मावच्छेदेन गृह्यते तं विधेयविशेषणतयावगाह
यति । तथा हि बीजमतीन्द्रियजातिमदभावात्यन्तरबीजत्वेन वांकुरजनकतावच्छेदकजातिमत्त्वान्यतरवत्त्वान्म
यत्त्वात्मतो हेतिसामान्यतो दृष्टावतारेऽपि ततादृशजातीनां ग्रहत्वच्यवध्यानभेदत्वादीनां बीजे वाधवशात् कल्पितताद्द
शजातिभिन्नत्वनिरुक्तान्यतरत्वावच्छिन्नविधेयताकानुमितिरूपेत्मर्हतीत्यवतादृशजात्यभावत्वावच्छेदेन रामः
निरुक्तविधेयतावच्छेदकप्रकारककल्पनाविषयत्वस्वरूपलाघवप्रतिसंधानवशाद्विधेयतादृशजात्यभावम ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शेषणतयाबोधयति॰ तथा च शब्दसमवायिद्रव्यसाधकानुमानेमूर्त्तसमवेतद्रव्याविशेषणतयाभासते॰ विभुसमात्मभेद
नुबाधवशादेवनसाधयितुंशक्यते॰ शुद्धविभुत्वावच्छेदेनवाधवशादेवनसाधयितुंशक्यते॰ शुद्धविभुत्वावच्छेदेनवि
धमानमपिबहुत्वगौरवनभूतभेदमाकारोभवेदिति॰ द्रव्यत्वस्वरूपपर्यवसितविधेयतावच्छेदकविशिष्टभूतत्वाधि
करणत्वस्यपूर्वसिद्धतयातत्रबहुत्वगौरवस्याग्रहाभावात्॰ एवंगन्धसमवायिकारणताधर्मावच्छिन्नत्वव्या
प्यवतिप्रसिद्धजातिभिरनवच्छिन्नत्वावप्रसिद्धजातीतरधर्मत्वविशिष्टाउपाधयोबहवः। जातिःशरीरत्वेन
घ्रिरितिवत्तत्समूहालंबनाद्युपाधिभिन्नजात्यभिन्नप्रसिद्धजातीतरधर्मावच्छिन्नत्वानुमितिनवाबाधेतिवक्ष्य
तद्धत्याहुः एवञ्चकर्णशरीरसंख्यागौरवनिर्वचनमिति॰ उच्यते॰ अस्तुतावदेवमेवकाम्यस्यगतःपदार्थोनिर्वक्तुं

म

स्यसत्त्वेननिरुक्तानुमानस्याप्रामाण्यप्रसंगात् परन्तु तादृशस्थले प्राथमिकानुमानेन गृहीते शब्दसमवायित्वे द्रव्ये शब्दसमवा
यितद्भिन्नतरोभयापर्याप्तित्वावच्छेदेन गौरवमुत्प्रेक्ष्यते ततो विभुसमवेतत्वव्याप्यमूर्तेतरद्रव्यसमवेतत्ववत्तायाः शब्दे पर्यांशैः
ततो विशेषशब्दसमवायितद्भिन्नतरोभयावृत्तित्ववद्भेदमवगाहमानानुमितिः क्रमादेकमात्रसमवेतत्वासिद्धिः तादृशाधित्वंवस
मवायितत्त्वमात्रवृत्ति घटादौ प्रसिद्धं इत्येवं सामान्यतः सर्वसमवेतत्वसिद्धमपि प्रकृतानुमानपर्यवसानात् आकाशं न सिद्धेदिति चे
न्न शब्देन विभुद्रव्यसमवेतः शब्दसमवायितद्भिन्नतरोभयासमवेतत्वग्राहकप्रमाणगोचरत्वात् इत्यादिपरिशेषानंतरेण विभुद्रव्यस
मवेतत्वबाधे प्रसिद्धं धर्म्यभिन्नविभुसमवेतत्वासिद्धिसंभवात् यथा च न भगवदेकसमवेताः शब्दास्तथा सिद्धांततत्त्वे प्रपंचितं रामः
नव्यास्तु वस्तुत्वमेव गौरवं तच्च पर्यवसितविधेयतावच्छेदकाधिशिष्टपक्षधर्मावच्छेदेन तद्धर्मविशिष्टभेदमसति बाधके विधेयवि ९६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नसंसर्गतदितरोभयावृत्तिसंयोगसमवायोभयत्वं च न संयोगतदितरोभयावृत्तिसमवायैक्यमर्थसिद्धं· यदि हि समवायद्वयं स्यात्तदा
तदुभयत्वव्याप्यसमवाये तद्भेदबाध एव स्यात्· इत्थं च व्यापकतावच्छेदकतया प्रमाणोपस्थितो धर्मस्तद्वत्तादितरो यदितरबाधोपने
यधर्मवत्तदितरोभयावृत्तित्वं तदेव वह्नेर्देहे न प्रमाणं गौरवं· तादृशाद्वित्ववद्भेदं विधेयतावच्छेदेन बाधमेवावगाहयतीति सामान्य
व्याप्तिः। इदमपि यत्र प्रसिद्धानां यावतामितरबाधादिना प्रतिक्षेपादप्रसिद्धमादायैव साध्यस्य पर्यवसानं तादृशस्थल एव निरू
ढद्वित्ववद्भेदोन्नायकं· एवं च घटादिकर्त्तरि लौकिकेन तादृशाद्वित्ववद्भेदोपनयः। अत एव मूर्त्तसमवेतत्वबाधसहकृतेन श्र
ब्दो द्रव्यसमवेतो गुणत्वादित्यनुमानेन सिध्यति· मूर्त्तेन वद्रव्ये मूर्त्ततदितरयोर्द्रव्यतदितरयोरवर्त्तमानस्याद्वित्वस्यानधिकरणत्वं
नोपनाय्यते प्रसिद्धविभूनामप्रतिक्षेपणात्· प्रसिद्धमेवादाय पर्यवसानसंभवात्· अन्यथा गगनेऽपि व्योमात्माद्वित्वादेस्तादृशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छिन्नत्वंवजीवात्मसुप्रसिद्धं· एवंगंधसमवायिकारणतायांभर्णावच्छिन्नत्वानुमानेप्रसिद्धजात्यवच्छिन्नत्वेबाधात्‌ जातौवलाघवप्र
तिसंधानात्‌ प्रसिद्धजातितदितरजात्यवच्छिन्नत्वपर्यवसिततंसाध्यं· तत्रयदिजातितदितरोभयावृत्तिप्रसिद्धजातितदितरोभयावृ
त्तिछित्वंसमवेयात्तदातादृशाजातिर्गुरुः स्यात्‌· स्वपुत्रेक्षायायोग्यतातादृशाछित्वविशिष्टगोरवप्रतिसंधानस्वरूपातद्बलात्ता
दृशाछित्ववद्वृत्तेविधेयजातौभासते· पृथिवीत्वगंधवत्त्वोभयावृत्तिछित्त्वंजातितदितरोभयत्रपृथिवीत्वद्रव्यत्वोभयवृत्तिछि
त्वंप्रसिद्धजातितदितरोभयत्रवर्त्ततइतिनतादृशाछित्वमादायबाधः। एवंगौरितिप्रतीतौविशेषणविशेष्यसंसर्गनिमित्तकत्वे
साध्यमानेसंयोगादिविषयत्वेबाधात्‌ संयोगादीतरसंसर्गनिमित्तकत्वेसाध्यमानेसंयोगादिविषयकत्वेबाधात्‌ संयोगादीतर दान:
संसर्गनिमित्तकत्वंपर्यवसिततंसाध्यं· तत्रतदितरोभयावृत्तिछित्ववद्वृत्तिविधेयसंसर्गताभासतेसमवायघटोभयवृत्तिछित्वं ९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.

सिद्धाप्यनुमितिपर्यवसानात् अभिमतानिर्वाह इति वाच्यम्ः पक्षधर्मताबललभ्यवस्तुनियादृश्यवृत्त्वसत्त्वेपर्यवसितसा
ध्येगौरवमुत्प्रेक्ष्यतेतादृशावृत्त्वावच्छेदेनगौरवग्रहस्यतादृशावृत्त्ववद्भेदोपनायकत्वात् तथाहि क्षितौकर्तरिसा
ध्यमानेलौकिककर्तृविधिवशात् अलौकिकः क्षितिकर्तापर्यवसितंसाध्यं तत्रयदिकर्तृकर्तृभयावृत्तित्वेकार्त्यंतद्धि
रावृत्तित्वेवातिलौकिककर्तृत्वतद्भिन्नतरोभयावृत्तियद्धित्वंतत्समवेयात्तदाक्षितिकर्तर्युरुः स्यात् इत्युत्प्रेक्षा साचन
स्वरूपसतीहेतुरितितद्योग्यतावाच्याकर्तृकर्तृभयावृत्तिलौकिककर्तृत्वतद्भिन्नतरोभयावृत्तित्ववैशिष्ट्यावच्छेदेनप्रका
रिताद्रूपभूत्यप्रकारत्वाभावबुद्धिस्वरूपाभवति तयाक्षितिकर्तरितादृशाद्धित्ववद्भेदउपनायते नहिकार्त्यंघयोभय
त्रलौकिककर्तृत्वभगवदुभयत्रचसमवेतस्यद्धित्वस्याधिकरणोक्षितिकर्तरिद्धित्ववत्सामान्यभेदोभवितुमर्हति तादृशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्मेवहुभेदेऽप्यवच्छेदकतायांवहुवृत्तित्वंवाभासेतेत्यपिसांप्रतं· एकस्यापिपदार्थांतरमादायवहुत्ववत्वेनएकत्वेरपि
वहुत्ववद्वृत्तित्वेनचसर्वत्रसंख्यागौरवोपनीतधर्मभानेऽप्रामाण्यप्रसंगात्· एकोनद्वावितितत्त्वानवहुवृत्तिरितिप्रती
तीनांएकत्वेद्वित्वाधिकरणताकच्छेदकत्वस्याभावोविषयः अस्तुलाघवोपनीतजातिनिष्ठावच्छेदकतायांवहुत्वाव
च्छिन्नाधिकरणताकत्वाभावोगौरवेणोपनीयतइत्यर्थःकिंजातिमात्रवृत्तित्वंसिद्ध्यतीत्युच्यते· तदापिजातिद्वयेप्रत्येकम
वच्छेदकताद्वयसिद्धावपितादृशानुमितेश्चारितार्थत्वात्अभिमतानिर्वाहइतिचेत्· उच्यते· प्रकारिताद्वयस्यस्वज्ञानप्र
कारत्वाभावस्यैकगौरवं· तत्रविशिष्टधर्मावच्छेदेनगृह्यमाणशरीरगौरवं· वहुत्वावच्छेदेनगृह्यमाणसंख्यागौरवं·
उभयमप्यवच्छेदकत्वादौविशिष्टधर्मविरहाद्यनवच्छिन्नत्वंसाधयति· नचतथापिवहुनाऽनवच्छिन्नत्वावच्छेदकत्व १४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानं घटत्वनिष्ठानवच्छिन्नप्रकारतानिरूपितवृत्तित्वनिष्ठविषयतानिरूपितावच्छेदकत्वादिनिष्ठविशेष्यताकज्ञानज
नने कारणं। समवायातिरिक्तसंसर्गेणानवच्छिन्नत्वाज्जातिर्नविशेषणीभवतीति पुनरप्रामाणिकं। एतत्त्वव्यवसायानंतरं ज्ञा
नविशेषणतया रजतत्त्वानुव्यवसाये व्यभिचारित्वेत्येवं शरीरगौरवलाघवेन दुर्वचं। ननु तथापि किं नाम संख्यागौरवं त्र
थवहुत्वमनेकत्वं वा ततः तत्तद्धर्मावच्छेदेन गृहीते तद्धर्मविशिष्टभेदस्तद्धर्मविशिष्टावृत्तित्वं वा विधेयधर्मो भासत इति
चेत्। तर्हि गंधसमवायिकारणतायां धर्मावच्छिन्नत्वे साध्यमाने जातिर्बहुरिति प्रतिसंधानवशात् धर्मे जातिभेदो व्यव
च्छेदकतायां जात्यवृत्तित्वं वा कथं न भासेतेति। अत एव जातौ सदपि शरीरलाघवज्ञानं जातित्वोपनयं प्रतिनक्षमेत्। नच
बहुत्वगौरवं बहुत्ववतो भेदं तद्धर्मवृत्तित्वं वा उपनाययति। तथात्वगंधसमवायिकारणतायां धर्मावच्छिन्नत्वसाधने ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिविवेकः घटइतिज्ञानेचउद्भूतविशेषितावच्छिन्नप्रतियोगिताकः केनापिधर्मेण घटत्वस्याभावोनास्तीतिमतं तत्रापि
घटत्वत्वावच्छिन्नप्रकारतासंबंधावच्छिन्नप्रतियोगिताको घटत्वत्वविशेषितस्याभावः प्रकारिताख्यस्वरूपज्ञानसामा
न्यवृत्तिरितिज्ञानमेवघटत्वत्वविशिष्टावृत्तित्वमवच्छेदकतायांग्राह्यमेदितिदिक् स्वांशेघटितस्यविशिष्टपदा
र्थस्यप्रकारितात्रयरहितज्ञानप्रकारत्वस्वरूपत्वमेवगौरवं तत्प्रतियोगिप्रकारत्वंस्वैकघटितयोर्लाघवं लाघ
वंतुघटत्वादौयत्किंचिदुपलक्षणधर्मसामानाधिकरण्येनगृह्यमाणेतथैवघटत्वादौवृत्तित्वमवच्छेदकत्वादौगता
ह्यति अस्तुवाप्रकारिताख्यस्वरूपज्ञानविशेषितनिरूपितायाप्रकारत्ववृत्तिप्रकारतात्वयाभिन्नस्याभिन्नस्यवावि रामः
शेष्यत्वस्यनिरूपकानवच्छिन्नघटत्वनिष्ठप्रकारताकप्रकारताख्यस्वरूपज्ञानंघटत्वप्रकार[illegible]कमित्याकारकं ९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यात् उभयत्रापिप्रतियोगितायाः समवायिसंयोगावच्छिन्नत्वेनावगाहनाविशेषात् ममम तेतु परं परासंबंधस्य
त्वे समवायसंसर्गताप्रतियोगिप्रकारतानिरूपिता न त्वधिकरणसंयोगादिसंसर्गता विशिष्टसंसर्गस्थले संयोग तु २
निष्ठा समवायिसंयोगत्वस्वरूपविशिष्टधर्मावच्छिन्ना संसर्गताप्रतियोगिप्रकारतानिरूपितेति वैशिष्ट्यसंभवा
त् आधिकरणसंसर्गस्य प्रतियोगितावच्छेदकत्वेन संसर्गतायाः प्रतियोगिप्रकारतानिरूपकत्वेपि यथा न
संयोगेन रूपाभावप्रतीतेर्भ्रमत्वं तथासिद्धांततत्त्वेमुक्तं एवंच प्रकृतेन तदुपलक्षिताभावप्रतीतौ न तदवच्छिन्ननि
रूपकताकत्वेन शुद्धसमवायादिसंसर्गावच्छिन्नाप्रतियोगिता भासते तद्विशेषिताभावप्रतीतौ तु तदवच्छिन्ननिरू
पकताकसमवायादिसंसर्गावच्छिन्नत्वेन प्रतियोगिता तदुपलक्षितप्रतियोगिप्रकारतानिरूपिता संसर्गताभावेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वाभ्युपगमात्. हृदे वह्निर्नास्तीति बुद्धौ हि वह्निप्रकारतानिरूपितसंयोगसंसर्गतानिरूपितावच्छिन्नत्वसंसर्गता
निरूपितप्रतियोगित्वसंसर्गतानिरूपितनिरूपितत्वसंसर्गतानिरूपितानुयोगित्वसंसर्गतानिरूपिताभाववत्त्वा
वच्छिन्ना विशेष्यतेत्येतावदुपपादितसिद्धा· संयोगेन वह्निमान् हृद इति विशिष्टबुद्धिप्रतिबध्यप्रतिबंधकतावच्छेदिका·
अन्यथा समवेतसंयोगस्वरूपपरंपरासंबंधावच्छिन्नप्रतियोगिताकाभावावगाहिबुद्धेरपि तथात्वप्रसंगात्. हृ
दसंयोगसंसर्गावच्छिन्नत्वावगाहित्वप्रवेशे प्रमेयसंयोगेन वह्न्यभावबुद्धेरसंग्रहप्रसंगात्. किंच· प्रतियोगिता
वच्छेदकसंसर्गतायाः प्रतियोगिप्रकारतानिरूपकत्वानभ्युपगमे समवायिसंयोगस्वपरंपरासंबंधमुद्रयावि रामः
शिष्टसंबंधमुद्रया स्वरूपाख्यप्रतियोगितावच्छेदकत्वं तद्भेदेनाद्विविधोऽभावस्तयोर्विचित्राप्रतीतिरित्यनुपपन्नं ९२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गभात् संभवति चतद्धर्मावच्छिन्नत्वनिरूपकताकसंसर्गावगाहिबुद्धिं प्रत्येव विशेषणतावच्छेदकप्रकारकनिर्णयस्य
जनकत्वं· तदभावादेव सदन्यसत्ता नास्तीति नप्रत्ययः। अथ गुणान्यत्वविशिष्टासत्त्वेति विशेषणतावच्छेदकप्र
कारकनिर्णयस्य सत्त्वप्रकारतानिरूपिताया गुणान्यत्वावच्छिन्नत्वनिरूपकत्वेनावच्छिन्नासंसर्गता तच्छालिबुद्धि
त्वमेव जन्यतावच्छेदकं· तत्र गुणान्यसत्तावान् गुणान्यसत्ता नास्तीत्युभयसाधारणं तदैव स्यात् यदि गुणान्यत्वा
वच्छिन्नत्वनिरूपकताकत्वेन प्रथमे समवायस्य वा द्वितीये प्रतियोगितासत्त्वाभावीयोः संसर्गतया भासेत· नवत्वया
गुणान्यत्वप्रतियोगितावच्छेदकतया भानमभ्युपेयते· प्रतियोगितावच्छेदकसमवायसंसर्गत्वं तु न प्रकारतया नि
रूपितमिति कथं तत्साधारण्यमिति चेत् न· प्रतियोगितावच्छेदकसंसर्गताया अपि प्रतियोगिप्रकारतानिरूपक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भावो द्विविधः। एको विरोधित्वोपलक्षितविरोधिस्याभावः। द्वितीयस्तद्विरोधितस्य· दंडीपुरुषो नास्तीत्येवमाकारि
कायाश्चबुद्धेर्द्वैविध्यस्यानुभवसिद्धत्वात्· अपसारितदंडपुरुषे प्रथमविशिष्टाभावस्याप्रतीतेर्द्वितीयस्यप्रतीतेः
सर्वजनीनत्वात्, तद्वैलक्षण्यंचनप्रकारकृतं· किंतु तदुपलक्षिताभावप्रतीतौ प्रतियोगितावच्छेदकीभूतशु
द्धस्वंसंयोगादिः संसर्गतया भासते· तद्विरोधिताभावप्रतीतौ तु विरोधित्वावच्छिन्ननिरूपकताक इति शुद्धसम
वायेन गुणान्यसत्त्वस्य गुणेन विघतएवाभावः। किंतु गुणान्यत्वावच्छिन्ननिरूपकताकसमवायेन· नवतादृशा
भावस्य शुद्धसत्तात्वमेवप्रतियोगितावच्छेदकं संभवतीति गुणे सत्ता नास्तीत्यपि प्रत्ययप्रसंगः प्रतियोगितावच्छे रामः
कतया गृह्यमाणस्य प्रतियोगितावच्छेदकसंसर्गनिरूपकतावच्छेदकस्य धर्मस्य प्रतियोगिविरोधित्वतयाभानोप ९९

ज्ञानत्वव्यापकस्यप्रकारितासंसर्गावच्छिन्नप्रतियोगिताकाभावस्यप्रतियोगित्वमेवगौरवं स्वीक्रियतांचघट इतिज्ञाने घटत्व
त्वावच्छिन्नस्यप्रकारितयाऽभावः सत्तावतिगुणेगुणान्यसत्त्वस्याभाववत् साचप्रतियोगितायद्धर्मावच्छेदेनगृह्यतेतद्ध
र्मविशिष्टावृत्तित्वमेवसिद्ध्यत्यवच्छेदकतायां अतएवघटत्वत्वविशिष्टघटत्वेनावच्छेदकताग्राहकप्रमाणप्रसरः प्र
कारिताद्वयशून्यज्ञानसामान्येघटत्वत्वेन प्रकारितयाचावच्छिन्नप्रतियोगिताकाभावस्याग्रहणात् प्रतियो
गितावच्छेदकधर्मावच्छिन्नाधिकरणतयैवसाधर्मत्त्वंताभावस्याविरोधात् अन्यथासमवायेनसत्तावतिगुणे
गुणान्यसत्ताभावस्यदौर्लभ्यप्रसंगात् प्रतियोगितावच्छेदकसंसर्गेणप्रतियोग्यधिकरणतायागुणेपिसत्त्वात्
अतएवोत्तेजकसमवधानकालेतदभावविशिष्टमण्यभावोमणिमत्यपिदाहेवस्तुनिनिराबाधः। यत्रविशिष्टा
यत्विति इतिमैथिलत्पनेनान्वितम्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पतावच्छेदकंचद्वयंनियमतःप्रकारितयावर्त्तते· अतएवाखण्डाभावादिर्व्यक्तिर्जात्यपेक्षयागुरुरितिव्यपदिशंति· स्वरूपेणज्ञा
तिभिन्नपदार्थानामप्रकारत्वात् तादृशज्ञानप्रकारत्वाभावश्चघटत्वावच्छेदेनगृह्यतेतद्धर्मविशिष्टावृत्तित्वंतद्धर्मानवच्छि
न्नत्वंवाऽवच्छेदकत्वादौसाध्येभासते· अस्तित्वतादृशज्ञानप्रकारतायाःस्वरूपेणाधिकरणेपिघटत्वेघटत्वत्वाद्यवच्छेदेन
प्रकारताद्वयमन्यज्ञानप्रकारत्वस्याभावइतिघटत्वत्वविशिष्टावृत्तित्वंतदनवच्छिन्नत्वंवाऽवच्छेदकतायां·संभवतिनस्वरू
पेणप्रकारताद्वयमन्यज्ञानप्रकारतावत्यपिघटत्वेघटत्वत्वाद्यवच्छेदेनतदभावःघटेरसवत्त्वेननबाधुर्यविस्मयःकिन्तुरूपव
त्वेनेत्यबाधितानुभवबलात् विषयत्वस्याव्याप्यवृत्तित्वोपगमात् अतएवतज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यत्वंरजत राम·
त्वप्रकारतात्वावच्छेदेनाभ्युपगच्छन्तोपिप्रामाण्यत्वावच्छेदेनतदभावंतार्किकाःसाधयन्ति· भवतुवाप्रकारताद्वयमन्य १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विषतागौरवमितियावत्. नन्वेकधर्मभिन्नवा विषयताविशेषणविशेष्यसंसर्गेषु पर्याप्ति. प्रत्येकपर्याप्तप्रकारत्वादिभ्योभिद्यते
चेतिचेत्. सेयं विशिष्टवैशिष्ट्यगोचरज्ञानीया विशेषणविशेष्यतावच्छेदकप्रकारकज्ञानादिजन्यतावच्छेदिका विशेष्यवि
शेषणं तत्र च विशेषमात्रमवगाहमानां बुद्धिं व्यावर्त्तयंती लौहित्यप्रकारतानिरूपितसमवायसंसर्गतानिरूपितवह्निविशेष्य
त्वेस्वरूपमंस्खलितविषयताश्रयस्य खंडशः प्रसिद्धेषु वैज्ञानिकविशिष्टेषु लौहित्यवन्न्यायादिषु अपि पर्याप्य वर्त्तमाना विशिष्टे
वे नरक्तदंडादिना पुरुषं ज्ञानामीत्यनुभवसाक्षिणी प्रकारत्वविशेष्यत्वस्वरूपाभ्यां विभिन्नैवेत्यन्यदेतत्. वस्तुतस्तु प्रकारितासंस
र्गितावच्छिन्नप्रतियोगिताकस्थित्वावच्छिन्नाभाववज्ज्ञानप्रकारत्वं लाघवं घटत्वादौ घट इति ज्ञाने हि प्रकारिता न द्वयं वर्त्तते १ -८
किन्तु घटत्वमात्रं तादृशज्ञानप्रकारत्वं गौरवं विशिष्टपदार्थे कंबुग्रीवादिमत्त्वादौ वर्त्तते विशिष्टप्रकारकज्ञाने विशेषणविशेष्य
विद्यते

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योरन्यतरत्वसामानाधिकरण्येन जलाहरणकारणतावच्छेदकत्वे साध्यमाने कंबुग्रीवादिमत्त्वं गुर्विति प्रतिसंधानबलात् कंबुग्रीवादिमत्तात्वाव
च्छेदकं न सा ध्याभावो भासते· यदि च स्वातंत्र्येणानुमितिविषयता न प्रामाणिकी· किन्तु विधेयत्वोद्देश्यत्वादिपारतंत्र्येणैव तदा साध्ये कंबुग्री
वादिमत्त्वं भासत इत्येवाभ्युपेतव्यं· इत्थं च गौरवं तल्लिंगाभावस्य तदभावस्य वा साधकं इति पक्षः संभवत्येवेति चेत् उच्यते· स्याद्यमीयंप्र
क्रियायदि गौरवं नाम किञ्चिदनुगतः पदार्थः शक्येत निर्वक्तुं· नन्वेकत्वमात्रव्यापकविषयतापर्याप्तिघटितत्वे लाघवं· द्वित्वसामान्य
समानाधिकरणाभावप्रतियोगिविषयतायाः पर्याप्तिरिति यावत्· घट इति ज्ञानीयप्रकारतात्वादिस्वरूपा हि विषयता घटत्व
मात्रे पर्याप्य वर्त्तते· कंबुग्रीवादिमत्त्वपर्याप्तानुविषयता न द्वित्वव्यापिका त्रिषु विशेषणविशेष्यसंसर्गेषु पर्याप्तित्वात् एकत्वा तनः
वच्छेदेनैकमात्रवृत्तिधर्मावच्छेदेन वा पर्याप्तिमाना विषयता लाघवं· द्वित्वावच्छेदेन द्वित्वव्यापकधर्मावच्छेदेन वा पर्याप्ति ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युज्यत एव तथाहि यत्रसाधनतापक्षः अवच्छेदकतानिरूपकत्वसंसर्गेणसाध्यः। तत्रानुमाने घटत्वकंबुग्रीवादिमत्त्वयोरुपस्थित
त्वेनावच्छेदकत्वप्रसक्तौघटत्वंलघुः। ततः कंबुग्रीवादिमत्त्वंगुर्विति ज्ञानबलाद्घटत्ववृत्तिकंबुग्रीवादिमत्त्ववृत्तित्वाभावस्यविधेय
विशेषणतयाभासते अपेक्ष्यतेचात्रसाध्ये अवच्छेदकताघातघटितत्वसंभावनं नहिघटत्वापेक्षयागौरपृथुलरासभत्वंगुरुत
रमितिप्रतिसंधानबलात्तादृशरासभत्वावृत्तित्वमपिजलाहरणकारणतावच्छेदकत्वेभासतइत्यनुभूयते नचान्यथैवानिरस्ते
वस्तुनिक्वविरुद्धपिगौरवमुपन्यस्यंतितांत्रिकाः। एवंयत्रमहानसीयवन्हितदन्यसाधारणवन्हित्वावच्छिन्नसाध्यकानुमानेमहानसीय
त्वादितरस्यवन्हिः पर्वतेसंभाव्यते तत्रगुरुर्महानसीयोवन्हिर्लघुरितरइति ज्ञानान्मांमहानसीयवन्हभाववान्पर्वतोमहानसी
येतरवन्हिमानित्यनुमितिरुत्पद्यते इत्थंचपक्षीयमपिगौरवंलाघवंलाघवंचोपयुज्यते तथाहि घटत्वकंबुग्रीवादिमत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रवत्वमहत्त्वकृतत्तानवच्छेदकताव्याप्यपरामर्शाद्विशिष्टानुमितिप्रसंग इति चेन्न इष्टापत्तेः। अभ्युपेयतां वा गौरवादिप्रयोज्यानुमितौ
शुद्धव्यापकतावच्छेदकधर्मावच्छिन्नापि नियमतो विधेयता। तथा च शुद्धसिद्धौ सत्यां व्यापकसामग्रीविरहादेव न विशिष्टानु
मितिः। एवं सति गौरवज्ञानविशिष्टशुद्धपरामर्शघटितायाः सामग्र्याः विशिष्टविशिष्टभानं निवेश्य भिन्नविषयकप्रत्यक्षादौ पृ
थक्प्रतिबंधकतापि न कल्प्यते। कृप्तशुद्धसिद्ध्यभावविशिष्टशुद्धपरामर्शघटितानुमितिसामग्रीप्रतिबंधकतयैवोपपत्तेः। सत्यां
शुद्धसिद्धौ सत्यपि गौरवादिज्ञाने भिन्नविषयकप्रत्यक्षादेर्वाभ्युपगमात्। अतो गौरवज्ञानस्य कंबुग्रीवादिमत्त्वव्या ज्ञानावच्छेद
कताव्याप्यपरामर्शजनितानुमितौ व्यभिचारो भवत्यनेन नत्वा घटज्ञानमपि व्याख्यातमिति निरस्तं। कारणवैशिष्ट्यस्य कार्यता रामः
वच्छेदकत्वात्। ननु कंबुग्रीवादिमत्त्वव्याप्यवत्ताज्ञानस्य तद्व्याप्तित्वादेरनुपस्थितिकाले कथं गौरवज्ञानमुपपद्यते इति चेत् नोप

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतीयन्ते· नचानुमितिनिरूपितप्रकारत्वविशेष्यत्वादेरयौगपद्ये कथं तत्सिद्धिरिति वाच्यं· बाधसत्प्रतिपक्षादिप्रतिबध्यत्वान्यथानुपप
त्त्या तत्प्रकारत्वादिसिद्धेः। नहि विधेयत्वाद्यवच्छिन्नं बाधादिप्रतिबध्यं· प्रतिबंधकत्वांतरकल्पनागौरवात्किं भयासिद्ध्यादेरदो
षत्वप्रसंगात्स्व· नन्वगौरवोपनीतधर्मप्रकारतानिरूपितविशेष्यताविधेयत्वाभिन्नैवाभ्युपेयतामिति कथं न यौगपद्यमेवेदिति वाच्यं
तथापि तद्भिन्नावच्छेदकतापन्नकंबुग्रीवादिमत्त्वव्यावृत्तत्वं कथं विधेयविशेषणत्वेन मानसप्रत्यक्षविषय इत्यनुपपत्ति
तादवस्थ्यात्· न संभवति गवाश्वयोरिव विधेयत्वविशेष्यत्वयोर्भेदः परिदृश्यमानविलक्षणव्यक्तिकल्पनागौरवदोषस्याभ
यत्र तुल्यत्वात्· (ननु गौरवाद्युपनीतधर्मस्याविधेयत्वविधेयत्वविशेष्यत्वयोर्भेदः परिदृश्यमानविलक्षणव्यक्तिव्यक्तिकल्प
नागौरवदोषस्योभयत्र तुल्यत्वात्) ननु गौरवाद्युपनीतधर्मस्याविधेयतावच्छेदकत्वेऽप्यवच्छेदकतासिद्धिकालेऽपि गौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्युपनीतधर्मावच्छिन्नत्वेनानुभूयते· अन्यथानुमितौ गौरवाद्युपनीतधर्मविषयत्वस्यायोग्यत्वप्रसंगात् अनुमितित्वावच्छिन्न
विशेष्यतानिरूपितविधेयत्वीयस्वरूपसंसर्गावच्छिन्नप्रकारतासंसर्गेण मानसबुद्धौ तादात्म्येन विधेयतया अनुमितिविशे
षणतापन्नविषयतानिरूपकत्वेन विषयतामानसे तादात्म्येनोद्देश्यतया· अनुमितिविशेषणतापन्नविषयतानिष्ठविशे
ष्यतानिरूपकविधेयनिष्ठप्रकारतावच्छेदकतासंसर्गेण तत्पुरुषीयमानसबुद्धौ स्वविधेयतावच्छेदकत्वसंसर्गेण तत्पु
रुषीयानुमितेरनुमितिविशेषणतापन्नविधेयतानिरूपकविषयतानिष्ठविशेष्यतानिरूपकविषयनिष्ठप्रकारतावच्छे
दकतासंसर्गेण तत्पुरुषीयानुमितेश्चकारणत्वाभ्युपगमस्यावश्यकतया अनुमितिनिरूपितप्रकारत्वविशेष्यतादेरयोग्यत्वात् रामः ७
नह्यपर्वतमनुमिनोमि वन्हित्वेन वन्हिमनुमिनोमि द्रव्यमनुमिनोमि द्रव्यमेव वन्हिमनुमिनोमीत्यादिकं पर्वतो वन्हिमानित्यनुमातारः

एतेनेत्यस्य निरस्तमित्यनेनान्वयः ॥ ५

ऐक्येनोत्पद्यत इति दिक्. तथा सति कुटिलकंबुग्रीवादिमत्त्वसामानाधिकरण्येन गौरवनिर्णयघटितविशिष्यवैशिष्ट्यबुद्धिसामग्र्या ह्र
च्छाविशिष्टायास्तदितरत्वप्रतिबंधकतायां कुटिलाभाववत्तानिर्णयाभावप्रवेशप्रसंगात् अनुभवविरोधाच्च. तत्साक्षात्कारणवै
शिष्ट्यमेव विशेषणतावच्छेदकप्रकारकनिर्णयजन्यतावच्छेदकं. इत्थं च कंबुग्रीवादिमत्ता गुरुरिति ज्ञानस्य विशिष्टवैशिष्ट्यबु
द्धिसामग्र्या इवावच्छेदकताया अप्यपरामर्शघटितायां कंबुग्रीवादिमत्ताव्याप्त्यवच्छेदकत्वनिरूपकसाध्यत्वानुमितिसामग्र्या
मपि घटकत्वमप्युपेयते. एतेन साधनता कंबुग्रीवादिमत्ताव्याप्तिभिन्नावच्छेदकतानिरूपिका न भवतीत्येतादृशेतरबाधो
पनीतकंबुग्रीवादिमत्वव्यापकत्वं विधेयतानवच्छेदकीभूयविधेयविशेषणतया भासत इत्यप्युपेयं. गौरवज्ञानतुल्यशीलत्वा
दितरबाधस्य. तथा च तादृशेतरबाधप्रयोज्यानुमितौ गौरवज्ञानस्य व्यभिचारः । किंच गौरवज्ञानप्रयोज्याया अपि विधेयता गौरवा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मत्त्वविशिष्टबुद्धौ कंबुग्रीवादिमत्त्वं गुर्विति निर्णयस्य याकारणत्वात्तयैव कारणतयोपपत्तेरतिरिक्तकार्यकारणभावकल्पनादोषोऽपि न
भवति तथाहि गुरुः कंबुग्रीवादिमत्ताविशिष्टबुद्धौ कंबुग्रीवादिमत्तागुर्विति निर्णयस्य कंबुग्रीवादिमत्तात्वावच्छेदेन गुरुत्वाभावाप्रका
रकत्वेन न कारणत्वं कुटिलकंबुग्रीवादिमत्तानगुरुः कंबुग्रीवादिमत्तानगुरुर्वेत्यपि वेति समुच्चया दर्शिता दृष्टबुद्ध्युत्पादात् नापि शु
द्धकंबुग्रीवादिमत्तात्वावच्छेदेन गुरुत्वाभावाप्रकारकत्वे सति कंबुग्रीवादिमत्तात्वसामानाधिकरण्येन गुरुत्वप्रकारकत्वेन कुटिल
कंबुग्रीवादिमत्तागुरुर्नवेति संशयादपि तदुत्पत्त्यापत्तेः अपितु शुद्धकंबुग्रीवादिमत्तात्वावच्छेदेन गुरुत्वाभावाप्रकारकत्वे सति शुद्ध
कंबुग्रीवादिमत्तात्वसामानाधिकरण्येन गुरुत्वप्रकारकत्वेन तथा च कुटिलकंबुग्रीवादिमत्तागुरुः कुटिलाभाववान्वा घट इत्यादिज्ञाना रामः
तच्छुद्धकंबुग्रीवादिमत्ताप्रकारकघटादिविशेष्यकविशिष्टवैशिष्ट्यबुद्ध्युत्पत्त्या न तत्र व्यभिचारः। न च तादृशस्थले विशिष्टवैशिष्ट्यबुद्धि ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.

व्यक्तिवृत्तित्वप्रकारतानिरूपितविशेष्यत्वाभिन्नावच्छेदकतानिष्ठविधेयताकानुमितित्वं कार्यतावच्छेदकं · तथा च घटत्वं लघु · घटत्वात्कं
बुग्रीवादिमत्त्वं गुरु स्यात् किंचिदवच्छेदकतानिरूपकत्वं व्याप्यवत्तीसाधनतेति त्रिसमूहालंबनेन घटत्ववृत्तिः कंबुग्रीवादिमत्त्वव्या
वृत्ताया अवच्छेदकतान्निरूपिकासाधनताइत्यनुमितिरुत्पद्यते · न च कंबुग्रीवादिमत्त्वव्यावृत्त घटत्ववृत्त्यवच्छेदकताकत्वे
व्याप्यपरामर्शजनितायामनुमितौ गौरवलाघवज्ञानयोर्व्यभिचार इति वाच्यं · कंबुग्रीवादिमत्त्वव्यावृत्तत्वाद्यवच्छिन्नत्वेना
द्यवच्छेदकतावृत्तिविधेयाविशेषणीयत्वात् · तद्धर्मावच्छिन्नव्यापकताज्ञानप्रयोज्यात् विधेयतान तद्धर्मानवच्छिन्नेति न
व्यभिचारः अस्तु वा स्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन कथितगौरवज्ञानविशिष्टज्ञानत्वाव
च्छिन्नप्रत्येव निरुक्तगौरवज्ञानस्य कारणत्वं · तेन प्रत्यक्षादिप्रमाणसहकारिताप्युपपद्यते · गौरवज्ञानस्य गुरु कंबुग्रीवादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म

मत्ववृत्त्यन्यतमाभावप्रतियोगित्वं तद्वृत्तित्वं वा अवच्छेदकतायां भासते· लाघवोपनीतं क्षितिकर्तृकत्वादिकमिव गौरवोपनीतं गु
रुत्वावृत्तत्वं व्यापकतानवच्छेदकं पि विधेयविशेषणतयानुमितौ भासत इत्यभ्युपगमे विरोधाभावात्· घटत्वावधिकगौरव
प्रकारतानिरूपितायां कंबुग्रीवादिमत्वत्वावच्छिन्नाविशेष्यतातच्छालिनिर्णयत्वेन कारणता· कंबुग्रीवादिमत्वव्यावृत्तत्वप्रका
रतानिरूपितविशेष्यत्वाभिन्नायावच्छेदकतात्वावच्छिन्नाविधेयतातच्छाल्यनुमितित्वं कार्यतावच्छेदकं· एतत्सहकृतापर
स्वतापरामर्शादिघटितानुमितिसामग्र्यां गृह्यत इति साधनत्वे कंबुग्रीवादिमत्वावृत्तित्वमात्रवृत्तित्वं वा अवच्छेदकतां· न च घटत्वस्य
कारणत्वाविति प्रसक्तत्वग्राहकालेपि कंबुग्रीवादिमत्वावृत्तित्वमवच्छेदकतायां कुतो न गृह्यत इति वाच्यं· लाघवोपनीतघटत्वे रामः
साधनावच्छेदकत्वग्राहिकाया अपि सामग्र्याः तत्सहकारित्वोपगमात्· घटत्वगोचरलाघवज्ञानस्यापि घटत्वत्वोपलक्षित ५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

देडत्वोभयावच्छिन्नत्वावगाहिन्यनुमितिरनुपपन्नास्यात् नन्वेवं तादृशेयप्रमाणसिद्धेऽप्यर्थे गौरवसहस्रस्याप्यकिंचित्करत्वात्
यदि च तादृशोपस्थापकप्रमाणाभावविशिष्टगौरवसहस्रस्य प्रतिबंधकत्वमाश्रीयते तदा क्लृप्तमनेन प्रमाणाभावादेव गुरुधर्मा
वच्छिन्नत्वासिद्धेः। यत्त्ववच्छेदकत्वविषयतानिरूपितविषयतासंसर्गेण बुद्धौ तादृशेण गुरोर्धर्मस्य प्रतिबंधकत्वमतस्तत्र कंबुग्री
वादिमत्वादेः संसर्गतयापि प्रतियोगितावच्छेदकत्वं न दृष्टान्तदृति प्रमाणाप्रसरादेव गुरुधर्मो नावच्छेदक इति तदननुभवविरोधि
कल्पनामात्रत्वादुपेक्ष्यं अथ द्वितीयो यो गौरवस्य तदभावसाधकताकल्पकत्वं गौरवस्य ज्ञानस्य वा सत्तत्र तथा प्रमाणत्वाभावा
त्कीदृशस्य प्रमाणस्य सहकारि गौरवमिति वक्तव्यं न तु जलाहरणसाधनताऽवच्छिन्नासाधनतात्वाद्वित्यनुमानेनावच्छेदक
तायां निरूपकतया कथितसाधनत्वे साध्यमानायां कंबुग्रीवादिमत्त्वं घटत्वाद्गुरुतरमिति प्रतिसंधानसहकारात् कंबुग्रीवादि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कात्वमन्यतमेयावच्छेदकतावच्छेदकत्वमितिरीत्याविन्नोमणविन्नेप्यभावव्यत्याससंभवात् विनिगमनाविरहादवच्छेद
ताभेदसिद्धौतद्वद्घटत्वकारणताभेदसिद्धिरितिवाच्यं· एवंसतियत्कारणतायाअवच्छेदकंघटत्वंतत्कारणतायाः कंबुग्री
वादिमत्वंयाअवच्छेदकं· तद्भिन्नाकारणतातु कथंतेननावच्छिद्यतेकथंवाद्रव्यत्वावच्छिन्नकारणताभिन्नाघ
टकारणतादण्डत्वेनावच्छिद्यतेइतिवैषम्यानुपपादनात्· यद्विघटवृत्तिजन्याहरणकारणतायांकल्पनालाघ
वोपनीतमेकत्वेप्रामाणिकंतदादंडवृत्तिकारणतायामपिलाघवादेकत्वमितितदुपपादकंघटत्वदंडत्वयोरेकत्र
द्वयन्यायेनावच्छेदकत्वमिति।प्रमिनुयाः। विवृतमेतत्सिद्धान्ततत्त्वे· किंचयत्रदंडवृत्तिघटकारणतायांदंडत्वाव रामः
च्छिन्नत्वव्याप्यस्वदण्डत्वावच्छिन्नत्वव्याप्यस्वदण्डत्वेदंडत्वावधिकगौरवावगाहीसन्नसख्यापराभवशक्तितोदण्डत्व ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शत्म- कत्वलक्षणायाप्रतियोगितायाअवच्छेदकताग्राहिकासामग्रीसत्तात्वादौविद्यमानासत्तेतर ःजातित्वादेश्चयेनगुरूहंप्रति
हणक्षीतिवाच्यं· एककार्यंप्रतिगुरुणाद्वितीयंप्रतिचलघुनाधर्मेणयुगपदेवकारणत्वयोर्ग्रहणेनअभिचारात् एककार्यम
नुमित्यादिकंप्रत्यपिलघुनापरामर्शत्वेनगुरुणापक्षतात्वेनघटादिकंप्रत्येकस्याएवकारणतायालघुनादण्डत्वेन
गुरुणादार्ढ्येनावच्छिन्नतायाएकेनज्ञानेनाविषयीकरणाच्च· एत्थंतद्धर्मेतत्कारणताव्यक्त्यवच्छेदकत्वग्राहिकया
सामग्र्यासमवहितस्यतद्धर्मविधिकगौरवग्रहस्यतत्कारणताव्यक्त्यवच्छेदकत्वग्रहप्रत्येवप्रतिबंधकत्वमित्युक्तावपि
नानिस्तारः। ननुयस्याःकारणतायाःदंडत्वमवच्छेदकंननस्याःदार्ढ्यं· किंतुकारणत्वांतरस्य· अत्रएवैकत्रनानाधर्माणां
समावेशस्तत्रअवच्छेदकभेदात्कारणताभेदस्तेषामेकतमस्यसाक्षादवच्छेदकत्वमन्यतमेषामवच्छेदकतावच्छेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रव्यत्वेनदृष्टदंडत्वादेरन्यथासिद्धिप्रसंगात् न च तत्कर्मनिष्ठतदवच्छेदकताग्राहकसामग्रीसमवहितं तत्र स्वविधिकगौरवज्ञानमेव द्वितीयध
र्मे तदवच्छेदकताग्रहप्रतिबंधकं ज्ञानग्रहणादावन्वयव्यतिरेकाभ्यां घटस्य कारणत्वग्रहे यत्र कुत्रचित्तदवच्छेदकताग्राहकेण सामान्य
तो दृष्टेन तुल्यवदेव घटत्वकंबुग्रीवादिमत्त्वयोरवच्छेदकत्वग्रहणसामग्र्यां विद्यमानायां पटत्वापेक्षया कंबुग्रीवादिमत्त्वं [illegible] वितिप्र
तिसंधाने गुरुधर्मे अवच्छेदकत्वग्रहप्रतिबंधिकाविनिगमना क्रियते द्रव्यत्वादेस्त्वतिप्रसंजकत्वप्रतिसंधानकाले घटादिकारण
तावच्छेदकत्वग्राहिका सामग्री नास्तीति तद्रूपेणैव गुरुणोपि दृष्ट दंडत्वादेस्तदवच्छेदकत्वग्रहः। अंत्यावयविन्यसमवायिका
रणविरहादतिप्रसंगे प्रतिहते स्पर्शवत्त्वे द्रव्यारंभकतातिप्रसंजकत्वप्रतिसंधानं नास्तीति विद्यते तत्र तदवच्छेदकत्वग्राहिका सा रामः
मग्री यतो गुरोरंत्यावयविभिन्नभूतत्वस्य न द्रव्यारंभकतावच्छेदकत्वग्रहः। एवं सकलसामान्यादिवृत्तेरभावस्य स्वाभावविर ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिन्नभूतत्वादेरस्पर्शवत्त्वाद्यपेक्षयागौरवप्रतिसंधानेपितत्रद्रव्यारंभकतावच्छेदकत्वग्रहः केनप्रतिबध्यते नहिस्पर्शवत्त्वमन्याव्य
विभिन्नभूतसमनियतावच्छेदकं घटादिवृत्तित्वात् नचसमनियतावच्छेदकत्वमहाय्यलघुधर्मेव्यापकतावच्छेदकत्वग्रहएव
प्रतिबंधकसहकारीतिवाच्यम् एवंसतिघटप्रतिसंयोगेनकारणतायांधर्माविच्छिन्नत्वानुमानेशुद्धवह्नित्वस्यातिप्रसंजकत्वप्रतिसं
धानान्मण्यभावविशिष्टवह्नित्वादेरवच्छेदकत्वतयाग्रहणप्रसंगः। मण्यभावत्वापेक्षयागौरवप्रतिसंधानेपिव्यभिचारकारणत्वाव
च्छेदकसंयोगेनमण्यभावेताद्दशवह्निव्यापकत्वग्रहाभावात् ननुताद्दशस्थलेप्यन्वयव्यतिरेकाभ्यांसंयोगेनवह्निविशेषण
तयामण्यभावस्यकारणताग्रहधौव्ये संयोगेनकारणतायांशुद्धवह्नित्वेनमण्यभावविशिष्टवह्नित्वं विशेषणतयाकारणता
यांशुद्धमण्यभावत्वेनवह्निविशिष्टमण्यभावत्वमन्यथासिद्धं परस्परसहकारित्वकल्पनादेवातिप्रसंगभंगादितिवाच्यम् एवमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मत्त्वमितिग्रहेऽपि विशेष्य[त्वा]दिसंसर्गेण कंबुग्रीवादिमत्त्वस्य प्रतियोगित्वकारणत्वाद्यवच्छेदकत्वग्रहो नानुपपन्नः। अस्तु वा धर्म
योः समनियमावच्छेदकत्वग्रहणमेव प्रतिबध्यतावच्छेदकं· तेन घटत्वस्य गगनाद्यवृत्तितया कंबुग्रीवादिमत्त्वविषमव्या
पकत्वग्रहकालेऽपि न कंबुग्रीवादिमत्त्वेऽवच्छेदकत्वस्य ग्रहो न वा सत्तात्ववैयधिकरण्यग्रहेऽपि सत्तेतरजातित्वादौ सामान्यादिवृत्त्य
भावप्रतियोगितावच्छेदकत्वस्य प्रत्ययः भवति एवं सत्तात्वसमनियमग्रहेऽपि गुणान्यत्वविशिष्टसत्तात्वे प्रतियोगितावच्छेदकत्व
बुद्धिः। अत्र च यत्संसर्गावच्छिन्नमवच्छेद्यं तदवच्छिन्नत्वेन समनियमो निवेशनीयः। तेन सत्तेतरजातिसत्त्वयोस्तादात्म्यावि
षत्वादिना परस्परविरोध अभिवारग्रहेऽपि न क्षतिः। अत एव सत्तात्वगुणान्यसत्तात्वयोस्तादात्म्यसंसर्गावच्छिन्नसमनियमा रामः
वच्छेदकत्वग्रहात् गुरुणो गुणान्यसत्तात्वस्य नान्योन्याभावस्य प्रतियोगितावच्छेदकत्वं प्रतीयत इति चेत्· एवमन्यावयविर २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानितिबुद्ध्युदयात्. कंबुग्रीवादिमत्त्वधर्मिकावच्छेदकत्वविशेषणकबुद्धित्वं तथेतिचेन्न गृहीतगौरवेपि कंबुग्रीवा
दिमत्वे धर्मिणि विषयतासंसर्गावच्छिन्नज्ञानविशेषाभावप्रतियोगितावच्छेदकत्वस्य संसर्गतया प्रकारतया वाग्रहात्.
अन्यथा कंबुग्रीवादिमत्वज्ञानं नास्तीति प्रतीत्यनुपपत्तेः। घटत्वव्यधिकरणत्वेन अभिचारित्वादिग्रहकाले कंबुग्रीवा
दिमत्वग्रुर्वितिज्ञानसत्वेपि तद्घटकसामानाधिकरण्यघटकीभूतसंसर्गावच्छिन्नप्रतियोगितावच्छेदकत्वस्यापिग्रह
श्च नतु गौरवं नाम सावधिः पदार्थः। तथा च घटत्वावधिकगौरवप्रकारककंबुग्रीवादिमत्वविशेष्यकनिर्णयस्य प्रतिबंधकता. तत्र
सामानाधिकरण्यतुल्यकालीनत्वाभ्यां सामानाधिकरण्यमात्रेण वा घटत्वकंबुग्रीवादिमत्वयोः समनियतग्रहोऽभ्यवच्छेदकत्वस्य प्र
तिबध्यतावच्छेदकं तु येन संसर्गेण तयोः सामानाधिकरण्यग्रहस्तत्संसर्गावच्छिन्नतावच्छेदकताविशेषणककंबुग्रीवादिम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

५२

श्रीगणेशाय नमः।प्रवहपवनवेगघट्टितोपि स्खलति न यः ऽजगदंडपिंडभारः। लघुगुरुतुलनातुलाप्रकारांऽद्भुतमगुणः सभ
वतु गौरवस्य १ हिरण्यगर्भस्य गुरुः शरीरसंख्यालघुर्यः पुरुषः पुराणः। अणोरणीयान्महतो महीयान्पश्यपत्यवधुः सभ्यणो
स्य कर्णः २ लघुः शरीरसंख्याभ्यां लोककल्पनया गुरुः अविक्रियः क्रियाकुर्वद्रूपो मे शरणं शिवः ३ सकलांकुरकर्तृबीजा
जगतं तदकारि याहृतां कुर्वद्रूपत्वं नाम सामान्यं न कल्पयितुमुचितं गौरवात् ननु गौरवेण गुरुवस्तुसिद्धिर्वा प्रतिरुद्ध्यते अनेतद
भावसिद्धिर्वा क्रियते आद्ये गौरवस्य स्वरूपतो ज्ञायमानस्य वा प्रतिबंधकत्वं प्रथमे गुरुवस्तुनोऽप्रामाणिकापि सिद्धिरनुप
पन्ना द्वितीये गौरवज्ञानस्य कंबुग्रीवादिमत्त्वविरोधकगौरवप्रकारकज्ञानत्वेन यदि प्रतिबंधकत्वं तदा किमस्य प्रति रामः
वध्यतावच्छेदकं न तावत्कंबुग्रीवादिमत्त्वावगाहिबुद्धित्वं तत्प्रकारकबुद्धित्वं वा निरुक्तगौरवज्ञानसत्त्वेपि कंबुग्रीवादि १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाघवगौरवविचारः॥

नं० ४३१६

लेखकः।

विश्वनाथशर्मा।

श्री ५ को सरकार
... संस्कृत ...

श्री ५ को सरकार
... संस्कृत ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आख्यातवादः। नं० ४३१५।
समाप्तः।

८

न्नतीत्यादेःप्रयोगस्याप्रसंगाच्च· तत्रतत्रतत्कालानुकूलतत्तद्व्यापारविशेषस्यवधात्वर्थः। सर्व
त्रधात्वर्थाश्रयत्वमेवकर्तृत्वंसंख्यावर्त्तमानत्वादिकंकेविदाश्रयत्वादिकमपिचाख्यातार्थइतिगु
रुमतमपि क्रव्यतादृशप्रयत्नाननुभवप्रसंगादनुपादेयमिति·॥इतिश्रीमहामहोपाध्यायश्रीमत्ता ... राम ः
कशिरोमणिकृताख्यातार्थविवेकस्समाप्तः॥श्रीधरेणलिखितमिदम्।॥ शुभमस्तु॥ श्रीः ॥

८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिति फाल्गुनवदि ७ रोज ६ कारीराम हस्ते मोहर रू० —— ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ती

८ शक्यत्वेवस्तुत्वस्याननुगतत्वेनच्छेदकानन्त्यम् नीलघटोनास्तीत्यादौनीलघटत्वाद्यवच्छिन्नत्वस्येव
पार्थस्वेत्यादौपार्थान्वयोगत्वावच्छिन्नस्याभावस्यप्रतीतिः।समानंचेदम् कृतौकालान्वयेवादिनाधा
त्वर्थानुकूलव्यापारविरहेपिमहीरुहादौसंयुज्यते· संयुक्त इत्यादिव्यवहारात् संयोगवत्त्वमात्र
प्रतीतेश्चनतत्रव्यापारवाचितेतिनसकर्मकत्वंसंयोगइत्यादौधात्वर्थमात्रप्रतीतेः।घटादौप्रयोग
साधुतामात्रमिति मण्डनमतानुसारिणः॥तन्न·पाकानुकूलवर्तमानयत्नाननुभवप्रसंगा राम
त्। फलानुकूलाइष्टवत्यपिपचतीत्यादेः विभागानुकूलपूर्वसंयोगादिमतिनिश्चलादावपित्य ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेष्यभावादेवकर्तृकर्मव्यवहारः। वस्तुतस्तु आख्यातस्यैव तृतीयाया अपि व्यापार एवा[illegible]र्थः। कर्मास्या
तस्यैव धात्वर्थफलनिरूपितमधिकरणत्वं कर्मकृतं फलाश्रयः कर्तृकृतश्च व्यापाराश्रयः। कर्मकर्तृसामा
नाधिकरण्यानुरोधात्। जानातीत्यादौ पूर्वोक्तैव रीतिरनुसर्तव्या। मैत्रेण पच्यते पक्व इत्यादौ तुवर्थव्यापार
एव वर्तमानत्वाद्यन्वयः पच्यमानः पक्ववानित्यादौ पुनरन्यपदार्थतावच्छेदकस्य व्यापार एव तदन्वयः॥
क्तो वा फलव्यापारयोरंशयोर्विशिष्टमन्वयबलल्लभ्यम् एवकारस्यैवान्ययोगव्यवच्छेदे अन्यथा अन्ययोगप्रति
योगिकस्यातिप्रसक्तत्वात् अन्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य शाब्दत्वे शाब्द्याप्रसिद्धिः। पा
र्थ एवेत्यादौ पार्थान्ययोगत्वावच्छिन्नव्यवच्छेदस्याप्रसक्त्य-प्रसंगश्च तस्यातत्तोऽन्यत्वात् अन्ययोगव्यवच्छेदत्वेन।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तोऽर्थयत्नोऽनुकूलव्यापारः। व्यापारमात्रम्वाऽऽख्यातस्य जन्यजनकभावः संसर्गमर्यादया लभ्यः। लडादि
तिङाद्यर्थो वर्तमानत्वादिः स्वसाधनत्वादिकमेकैकपदोपात्तत्वप्रत्यासत्त्या तत्रैवान्वेति भावप्रत्ययस्य घञा
देरनुकूलव्यापार एवाख्यातार्थः तेन व्यापारसत्त्वे फलानुत्पाददशायां पाको भविष्यतीति न प्रयोगः। न
वा व्यापारविगमे फलसत्त्वे पाको विद्यत इति। नापि घटस्पन्दे तत्तद्योर्मिथस्संयोग इति वह्निर्योगमनमित्या
दिः। प्रत्ययोपनीतपरसमवेतव्यापारजन्यधात्वर्थशालित्वं च कर्मत्वम् पाकनिष्ठं चाधेयत्वं द्वितीयादि राम ६
ना व्यापारनिष्ठं च तृतीयादिना अभिधीयते एवञ्च तण्डुलं पचति चैत्र इत्यत्र तण्डुलवृत्तिजनकव्यापारवा
न्चैत्रः। मैत्रेण पच्यते तण्डुल इत्यत्र मैत्रजन्यफलविशेषशाली तण्डुल इत्यर्थः। फलव्यापारयोर्विशेषण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रियान्वयिपरसमवेतत्वमपिकर्मप्रत्ययार्थः। इयांस्तुविशेषोयत्परत्वंसुपामकृत्यर्थापेक्षिकम् तिङादीनाञ्च
स्वार्थफलाश्रयापेक्षिकंप्रत्याय्यते॰ घटंजानातीच्छतिकुरुतेचैत्रो मैत्रेणाज्ञायतेइष्यतेक्रियतेघटइत्यादौस
विषयकार्थाभिधायिधातुयोगेकर्मप्रत्ययेन यथायथंविषयित्वं॰ विषयत्वंवकर्तृनिष्ठाश्रयत्वंतृतीय
यानाधेयत्वं बोध्यते। अन्वयबोधेत्वयंविशेषोयदेकंकर्तृप्रत्ययाश्रयत्वंतत्रक्रियातत्रविषयतातत्रक
र्मविशेषणम्। अन्यत्रकर्मणिविषयतातत्रक्रियातत्राधेयत्वंतत्रचकर्तेति॰ ज्ञातोज्ञातानघइत्यादौच
कर्तृकृतांविषयाश्रयप्रतियोगिकबोधकत्वम् यत्तत्इत्यादौचयत्नादिर्नोपस्थिते यत्नेविषयत्वेनना
न्वयः अपितद्धेतुत्वेनपदस्याभावात् अतएवाभुञ्जानेपिभोजनाययतनइत्यादयः प्रयोगाः।धा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

५ वाचकतदादेरिव भुजतिगम्यादेरर्थतावच्छेदकतत्कालिवाचकाख्यातकृतोरपि विशेषरूपेण बोधकत्वम् । अपि च धा-
त्वर्थतावच्छेदकफलशालित्वं कर्मत्वं न तु धात्वर्थजन्य फलशालित्वमात्रम् । गमिपत्योः कर्मत्वस्य पूर्वस्मिन्दे-
शे त्यजेश्चोत्तरस्मिन्देशे स्पन्दे पूर्वापरयोः प्रसङ्गात् । फलावच्छिन्नव्यापारबोधकत्वादेव धातूनां सकर्मक-
त्वव्यवहारः । घटं जानातीत्यादेः तादृशधातुप्रयोग एव च कर्मप्रत्ययाः तत्र च द्वितीयया आधेयत्वमभि- एम॰ १
धीयते तच्चाकांक्षादिवैचित्र्यात् धात्वर्थतावच्छेदकेपि फलेऽन्वेति । अत एव चास्याः पदार्थान्विताधेयत्वबो-
धकसप्तमीभेदः । अस्तु वा कर्माख्यातस्येव द्वितीयाया अपि फलमर्थः आस्तां वा फलव्यापारौ पृथगेव ५
धात्वर्थौ विशिष्टस्त्वन्वयबललभ्यः । भूमिं प्रयाति विहगो विजहाति महीरुहम् । नव स्वात्मानमित्यनुरोधात्

ष्ठान्तराणामनुशक्यत्वं विलीयते । केवलेपि विशेषणे स्वारसिकप्रयोग विरहस्तुल्य एव । एवञ्च गतो गम्यत इत्यादौ फलस्य कृदा
त्मनेपदाभ्यामेव लाभाद्गमयात्याद्यातोरनयोरुक्तव्यापारविशेषमात्रवाचकत्वस्थितौ ग्रामं गच्छति ग्रामस्य गन्तेत्यादौ द्वितीयादेः ।
फलजनकत्वलक्षणं कर्मत्वमर्थः । फले च प्रातिपदिकार्थो विशेषणतयान्वेति । फलमात्रं वार्थो जनकत्वं संसर्गमर्यादयात्त
प्रमितिकेचित् । तदसत् । ग्रामं गच्छति त्यजतीत्यादौ द्वितीयादिना फलसामान्यलाभेपि नियतसंयोगविभागाद्यलाभात् ॥
फलविशेषावच्छिन्नव्यापारस्यैव धात्वर्थत्वात् । अन्यथा त्यजिगमिप्रभृतीनां पर्यायतापत्तेः । तथापि गम्यते ग्राम इत्यादौ ग्रा
मादेः संयोगशालित्वं कुतः प्रतीयते इति चेत् । तदवच्छिन्नव्यापारवाचिधातुसमभिव्याहारादेव पथ्येष्टसाधनं बोधकादिव ल०
देव स्वर्गकामादिसमभिव्याहारात् सुखादिजनकत्वं लिङ्फलस्यां सुखत्वसंयोगत्वाभ्यां वैलक्षण्यदेतत् । अस्तु वा बुद्धिविषय

२७।१

४ फलेऽन्वयः कृदर्थकृतेः क्रियायां विशेषणत्वेनैवान्वयस्य व्युत्पन्नत्वात् कर्तृकर्मवत् कृतिफलयोरप्यभिधाने नियमान्नातिप्रसंगः नचा
पश्यते तण्डुलो मैत्रेणेत्यादयः प्रयोगाः लिङ्‌प्रत्याख्यातां संख्यायाभावनायाश्च प्रथमान्त [illegible] पदोपस्थाप्ये नैवान्वयो व्युत्पन्नः
चैत्रो गतो गन्ता ग्रामो मित्रापक्वी गतं पुरम् ओकारप्रतिपक्षान्निर्मुक्तः पक्षापक्षार्थता भित्राद्ये सामानाधिकरण्यानन्यथानुपप
त्त्या कर्तृकर्मलोकसिद्धेः चैत्रस्य न ग्रामे चान्तो घटात्पृथक् पचे पचे वेत्यादाविव पदार्थतावच्छेदकेनैव कृत्यादिना धात्वर्थान्वयः
तथैव साकांक्षत्वात् अस्तु वा कृत्यादिघटितरूपेण कर्त्रादिना सममन्वयः मुख्यभाक्तसाधारणस्य फलादिलक्षणस्य कर्मत्वस्य
कृत्यादिलक्षणस्य कर्तृत्वस्य चानभिधाने द्वितीयादयः कृतादिविशिष्टस्याभिधाने विशेषणस्याप्यभिधानात् यत्तु आतेन
रमणत्वेन कृतौ शक्तिः पाचकादिपदे तु सामानाधिकरण्यानुरोधाद्विशिष्टे लक्षणेति तन्न भावकृतोऽपि कृतिवाचकताप रामः
त्तेः धात्वादिघटितत्तस्मादाख्यातत्वस्यैव दुर्ग्रहत्वाच्च यदपि कर्तृकृतोऽपि कृतौ शक्तिः कृतिविशिष्टे लक्षणेति तदप्यसत् यतोऽपि ४
नावच्छेदकरूपं शक्यत्वासंभवात् गोत्वस्वत्वादिना शक्तौ जातिगौरवात् अस्तु गवादिपदानां गोत्वादिविशिष्टे शक्यम् विशि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिन्नबोधकत्वलक्षणं सामानाधिकरण्यमस्ति द्रुम· संभवद्न्याद्यर्थं तु न वार्यते· अथ चैत्रः पचति तण्डुलमित्यत्राश्रयतया चैत्रो तु भावनाविशे
ष्यः चैत्रेण पच्यते तण्डुल इत्यत्र तण्डुलस्तु कथं विशेष्यतयेति चेत्· रथेन गम्यते ग्राम इत्यादौ सविशेषव्यापारानभिधाने का गतिः अत्रत्रं
च: मैत्रेण पच्यते तण्डुल इत्यत्र मैत्रनिष्ठपाकभावनाविषयो मैत्रनिष्ठविक्लित्त्यनुकूलव्यापारजन्यफलस्य ... तण्डुलः प्रतीयत इति साक्षात्परंपरया वा ली रूपा
विशेष्यस्तण्डुलः रथेन गम्यते ग्राम इत्य ... रथनिष्ठगमनानुकूलव्यापारजन्यफलशाली ... ग्रामः प्रतीयत इति व्यापारविशे
ष्यो ग्रामः तस्मात्तु भावनादेराख्यातलभ्यत्वादाधेयत्वं तृतीयार्थोस्तु· संख्याश्रयत्वं वा· संबंधस्तु पचतीत्यादिवाक्यार्थः अतएव
त्वं कर्मत्वेऽपि ... बंधस्तथा· फलं त्वाख्यातस्यार्थः न च तद्वितथापि कारिमुपधासमानत्वात्· फलावच्छिन्नक्रियायामात्मनेऽर्थत्वेऽपि
क्रियाजन्यफलालाभात्· विशेष्यविशेषणभावविपर्ययस्याशक्यत्वात्· तस्मात्फलमात्मने ... पदार्थः इत्थं चाख्यातोपस्थित तावत्......
... भावनायाः क्रियाविषयिण्याः फलेनान्वये फलस्य क्रियाजन्यत्वं न लभ्येत· भावनाया विषयस्य च क्रियायाः फलेनान्वयेति द्वयस्थापितभावनादे
यां विशेषणत्वेनान्यत्र लक्षणान्वयो भज्येत· तस्मात्कर्मत्वानभिधायकभावकर्मप्रयोगे लकारशब्दैः सुपो लभ्ययाभावेन वा विशिष्टायाः·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३ यः। चैत्रेण सुप्यते गगनेन स्थीयते इत्यादौ प्रथमान्तपदाभावात् धात्वर्थस्य भावनायां विशेषणतयैवान्वयस्योत्सन्नत्वात्
भावनाया बाधितत्वाच्च भावनाविशेष्यविरहादनन्वितैव संख्या एकवचनं तु साधुत्वार्थम् एतएव स्वापस्य द्विबहुत्वेपि औ(
त्सर्गिकमेकवचनमेव· एवञ्च भावतिङां यथायथं वर्त्तमानत्वादिकमिष्टसाधनत्वादिकमर्थः। तच्च धात्वर्थ एवान्वेति तथैव
प्रत्ययात् तद्बोधकानां तु घञादीनां प्रयोगसाधुतामात्रम् भावनायाश्च कर्तृप्रत्ययत्वेन कर्मणि पुनरन्यथान्वयः
तवकर्तृकर्माभिधायित्वबद्धास्माकमपि तथान्वयबोधकत्वम् अतो मैत्रेण पचति तण्डुलस्तण्डुलं पच्यते मैत्रो मैत्रः एम ४
पक्ष्यते तण्डुल इत्यादयो न प्रयोगाः। भावनाव्यापारमात्रोपक्षिको· अ चै तनानुरोधात् भिन्नाभ्यां रूपाभ्यामेकध(३

ल१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्तो शक्तताशक्यतावच्छेदकयोस्तु गौरवमधिकम्· तस्मादाख्यातत्वेन कर्त्तरि कर्मणि वात्मनेपदत्वेन एकवचन
त्वादिना तत्तद्रूपेण एकत्वादौ शक्तिः। एकपदोपात्तत्वाच्च· संख्यायावाख्यगामित्वं कर्तृकर्मबोधकत्वंच्चैकदा
मुत्पन्नमतश्चैत्रः पच्यते तण्डुलः इत्यादयो न प्रयोगाः। कर्त्तरि यकोऽसाधुत्वाच्च। पच्यते चैत्रस्तण्डुल इत्यादयो पि
नेति वैयाकरणाः। अत्र वदन्ति· भावनाविशेष्यैव संख्यान्वयः। समानपदोपात्तत्वेनैकान्वयस्यौचित्यात्।
भावनायाश्च विशेष्यत्वेनान्वययोग्यः कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यस्तथैवाकांक्षितत्वात् चै
त्रः पचति पच्यते तण्डुल इत्यादौ कर्तृकर्मणी प्रथमान्तपदोपस्थाप्यतया भावनाया विशेष्ये इति तत्रैव संख्यान्व

आख्यातवाद

२

कादृशजनककृत्यादिनार्थान्तरप्रसंगोपि प्रत्युक्तः भावे यातादृशकृतिनिरूपकत्वाभावाद्धात्वर्थस्य जनककृत्याभावस्यापि यावत्त्वात्.
यत्नमात्रांशस्यैव विषयितासंजनकत्वं वा संसर्गमर्यादया भासत इति नव्याः कर्तृकर्मणी लकारवाच्ये. चैत्रः पचति तण्डुलः पच्यते इति।
सामानाधिकरण्यानुरोधात्. अन्यथा पचतीत्यत्र कर्तरि तृतीयापत्तेः पच्यत इत्यत्रापि कर्मणि द्वितीयापत्तेः. तयोरनभिहिताधिकारी
यत्वात्. कृत्यभिधानस्याविशिष्टत्वात्. कर्तृकर्मगतसंख्याभिधानानभिधानाभ्यां नियमः. न च चैत्रेण दृष्टो हारादौ वचनायत्तिः ख्याते
संख्याप्रतीतेः एकत्वाद्यंशे सुप एव संख्योपस्थितिसंभवे तिङा तदभिधायकत्वमिति वाच्यम् चैत्रो मैत्रश्च गच्छत
इत्यंशे विनापि तादृशानुपूर्वीं बहुत्वादिप्रत्ययात् लाघवादेकवचनत्वादिना एकत्वादौ शक्तत्वाच्च इत्यपि नास्ति कृ रामः
तासंख्यानभिधानात् किं च एकत्वत्वादिना संख्याभिधानेन नियमः पदार्थतावच्छेदकावच्छिन्नस्याकांक्षा २
दिवशात् कर्तृकर्मसाधारण्येनान्वयबोधस्य दुर्वारत्वात् कर्त्रैकत्वत्वादिनाभिधाने तु कर्त्रादेरप्यभिधेयत्वम्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रियानुकूलव्यापारप्रतीतेर्बाधकं विनागौरणत्वायोगात् जनकव्यापारएवाख्यातार्थः तंडुलकर्मकयत्नादेश्च नपाकादिजनकत्वमिति
नातिप्रसंगः कथं तर्हि पचतीत्यादौ पाकजनकयत्नानुभवइति चेत् यत्नाविनाभूतपाकादिनाक्रियाविशेषेणाकारणेयत्नानुमानात्
पचतिपाकयत्नवानिति तु तात्पर्यविवरणम् अन्यथाधर्मिणोवाच्यतापत्तेः अथैवंयत्नस्यवर्तमानत्वेनप्रतीयेत यत्नस्यापदार्थत्वात्
अन्यत्रधात्वर्थक्रियायां [illegible] त्वा र्थव्यापारेलडादेर्वर्तमानताद्यनुभावकत्वस्य व्युत्पन्नत्वात् इत्थं च पाकजनकवर्तमानव्यापारेण
पाकजनकयत्नानुमानम् यत्नविगमेपिवर्तमानव्यापारानुवृत्तेः धर्मिविशेषानिष्ठतानयत्नस्यनप्रतीयेत तत्राधिकरणव्यापारस्यापि
पाकजनकत्वात् चेतन्याविनाभूतचेष्टात्वादिविशेषवितेनतेनयत्नानुमानमिति चेन्न चेष्टात्वाद्यप्रतीतावपि शोभनः पचतीत्यादौ शो
भनादेः पाकजनकयत्नवत्वप्रतीतेरिति सत्यम् तत्राख्यातस्यजनकयत्नेलाक्षणिकत्वात् मैवम् जनकव्यापारमपेक्ष्ययत्नलाघवेनज
नकयत्नस्यैवशक्यत्वात् यत्नं विहायजनकमात्रेशक्तौ रथोगच्छतीत्यादावचेतनेविप्रयोगोनुपपन्नएवेतिचेन्न अपचत्यपिपाकजनकादृष्ट
वतिपचतीतिप्रयोगापत्तेः पाकजनकादृष्टजनकस्नातेर्नपाकजनकत्वम् मानाभावात् अतएवस्नित्यादेः कर्तृजन्यत्वेसाध्येतज्जन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ श्रीगणेशाय नमः आख्यातस्य यत्नो वाच्यः पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात् व्यवहाराद् विवा
श्रीं धकं विना विवरणादविश्रुतेः किं च करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनाऽनुपपत्तेश्च अचेतने रथो गच्छतीत्यादौ वानुकू
लव्यापारे लक्षणेति वाच्यः अन्यदीयगमनानुकूलनोदनादिमति गच्छतीत्यप्रयोगाद् रथो गच्छति जानाति इच्छति यतते द्वेष्टि विद्यते नि
द्रातीत्यादौ क्रियानुकूलकृतिव्यापारयोरप्रतीतेः गत्यादिमत्त्वमात्रप्रतीतेश्चाश्रयत्वेनैव प्रतीत्यादौ नाशप्रतियोगित्वे निरूढलक्षणा
चैत्रस्तण्डुलः पचति मैत्रः पच्यते तण्डुल इत्यादावन्वयाबोधेन धात्वर्थप्रातिपदिकार्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नतया संबंध
मर्यादया तज्ज्ञानस्यासंभवादिति नव्याः कृतेश्चाश्रयत्वाभिधायकत्वं क्रियाजन्यत्वप्रतिसंधानाविशेषेऽपि जन्यत्वाजन्यत्वप्रतिसं १५
धानात् पर्यंकुरयोः कृताकृतव्यवहारात् तान्त्रादिवदाश्रयपरत्वं न कर्तृपदस्य च यत्नाश्रयबोधकत्वात् क्रियायाः क्रियानुकूलव्यापा राम:
रस्य वा कृत्यर्थकत्वे क्रियाश्रयः कारकमात्रं वा कर्तृपदार्थः स्यात् अथ रथो गच्छति गमनं करोति बीजादिनांकुरः कृत इति विनापि यत्नं कृ
तः प्रयोगात् तस्यैव यत्नवाचकत्वं कर्तृपदे च कर्मण्येव यत्ने निरूढलक्षणा यदि क्रियाश्रयमात्रेण तत्प्रयोगः एवं चाचेतने विपचतीति प्रयोगात् १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं० ४३१५

आख्यात वादः

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं० ४३१४

न्यायः

श्री ५ को सरकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१ ॥ श्रीसिद्धेश्वर्यै नमः ॥ प्रमाकरणत्वेन माहुः ॥ ज्ञानं नानुव्यवसायग्राह्यं परं तु स्वयमेव स्वं स्वाश्रयमात्मानं च गृह्णाति । एवं च घट इत्या
घाकारकव्यवसाय एव घटमहं जानामीत्याद्याकारकः । तस्य मितिमात्रंशे प्रत्यक्षरूपता । घटादिरूपमेयांशे चक्षुरादिविकल्पत्वरूपता
क्वचिदनुमितिरूपता । अथैवं मीमांसकमते पाप्रमत्वस्य ... वाहीनां ज्ञातित्वानुपपत्तिरिति चेत् इष्टमेवैतत् गुरुमते ज्ञातेरसाक्षात्कारः । अयथार्थं हि किंचि
दंतदंशेऽप्रत्यक्षत्वेन तावत्तद् ... इन्द्रियसंनिकर्षजन्यत्वं तन्मते ज्ञानेन्द्रियसंनिकर्षस्य ज्ञानजनकत्वात् ज्ञानांशेऽप्रत्यक्षत्वानुपपत्तेः । ना व
पि तद्विषयकज्ञानाजन्यत्वं ज्ञानानुमित्यादीनां ज्ञानविषयकपरामर्शजन्यतया ज्ञानांशेऽप्रत्यक्षत्वरूपतानुपपत्तेः । न चेष्टापत्तिः मितिमा
त्रंशे त्रेप्रकाशांशे सर्वमेव प्रत्यक्षमिति सिद्धान्तविरोधात् ॥ यत्र तु अनुमेयज्ञानांशेऽप्रत्यक्षत्वा ... कत्वं नेष्यते एवं परं तु स्वात्मकज्ञा
नांशे एवं तन्न नानुपपन्नं । स्वस्य स्वविषयकज्ञानाजन्यत्वात् । न च यत्र स्वविषयकपरामर्शजन्यत्वविशेषकानुमितिः तत्र का गतिरि
ति वाच्यं । तादृशोऽपि प्रत्यक्षत्वमभ्युपगमानामस्माकं स्वघटितस्वविषयकज्ञानस्यैवासंभवात् । स्वत्वघटितस्वविषयक
परामर्शात् स्वविधेयकानुमितेरप्रसिद्धेरिति । तदप्यसत् । एवं यदनुमिते ... शेऽप्रत्यक्षत्वरूपतापादुरुपपादत्वात् । अपरं च व्यक्ति
गोचरानुमित्यादेस्तदंशेऽप्रत्यक्षत्वापत्तेश्च ॥ यदपि तदंशे ... ज्ञानविषयतासामान्यमेव तदंशेऽप्रत्यक्षत्वं ज्ञानानवच्छिन्नत्वं च ज्ञाने र
जन्यतावच्छेदकत्वं अनुमित्यादेर्यद्विषयकत्वविषयतायां परामर्शजन्यतावच्छेदिका अतो न तद्विधेयांशेऽप्रत्यक्षत्वापत्तिः । १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ःज्ञानात्मानुमितौ च विधेयारिमुद्रयाज्ञानादिविषयतया अपि तत्र संसर्गे न तत्तद्ग्रोपस्थितद्रूपता अस्त्येव। न च प्रत्यक्षात्मकघटादिविशिष्टबु
द्धावपि घटाद्यंशे तथात्वानुपपत्तिः तादृशज्ञानीयप्रकारत्वाद्यवच्छेदक[illegible]विषयतायां विशेषणज्ञानजन्यतावच्छेदकत्वादिति वाच्यं विशि
ष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया अनभ्युपगमात् प्रकारतया ज्ञानजन्यतानवच्छेदकत्वादिति ~~वाच्यं विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य~~
~~हेतुतया अनभ्युपगमात् प्रकारतया ज्ञानजन्यतानवच्छेदकत्वादिति~~ ॥ तदपि न सम्यक् ॥ अनुमित्यादेः साध्यांशे प्रत्यक्षताया दुर्वा
रत्वात् तथाहि अनुमित्यादेः साध्यांशे विधेयत्वादिवत् प्रकारत्वाद्यपि विषयतायाः स्वीकार आवश्यकः। अन्यथा साध्यविशेष्यकसा
ध्यविशेषणकानुमित्योरवैलक्षण्यप्रसंगात् प्रकारतायाश्च बाधादिमति च ध्यक्तायाः अवच्छेदकतया तथात्वे अनुमितौ इत्यादिकालेऽनुमित्याप
त्तेश्च। एवं च विधेयत्वादिविषयतायाः ज्ञानजन्यतावच्छेदकत्वेपि अतथाभूतप्रकारत्वादिशालित्वप्रत्यक्षत्वापत्तिरिति चेत् मैवं॥ साध्यांशा
सा४ दिव्यंजकतया तद्भिन्नतो विषयताविशेषस्य वक्तव्यत्वेन तवबाधादिविधेयकानुमितौ न साध्यांशे अपि तु मिति मात्रेशे एवं एवं मितिका घं४
नानुमितौ साध्यांशे प्रतीति न कश्चिद्दोषः। अथ प्रत्यक्षविषयतायाः स्वजनकसंनिकर्षाश्रयत्वनियतत्वात् ज्ञाननिष्ठसंनिकर्षस्य तद्धनये
प्रत्यक्षाजनकतया ज्ञानस्य स्वजनकसंनिकर्षानाश्रयस्य कथं प्रत्यक्षविषयतेति चेत् स्यादेवं यदि तादृशनियमः ~~प्रामाणिकः~~ प्रामाणि
कः स्यात् ज्ञानस्य ~~कन्यत्नैवमित्यर्थ~~ स्वप्रकाशतायां साधकविरहस्यापि नाशंकनीयं स्वविषयकज्ञाने तत्काल्यत्प्र

युक्तलाघवसहकृतस्य[illegible]नुमानेऽस्वप्रकाशत्वापादकानु[illegible]मानत्वात्· न चैवमिच्छादीनामपि स्वप्रकाशता कथं नोपेयत इति वाच्यं । इ
च्छादीनामनुव्यवसायोपगमस्यावश्यकत्वात् तेषां स्वप्रकाशत्वे मानाभावात्· तेषामनुव्यवसायानुपगमे तद्विषयकस्मरणाभावेन तद्व्यव
हारानुपपत्तेः व्यवहारादेश्चैव हर्त्तृस्मरणोत्तरत्वानादिसाध्यत्वात्· ज्ञानस्यैव विषयसाधकतयाच्छादीनामप्रामाणिकतापत्तेः । एवमिच्छादि
गोचरस्मरणाद्युपपत्तये पितदनुव्यवसायोपगम आवश्यकः स्मरणस्य स्वविषयकज्ञानसाध्यत्वादिति ॥ स्यादेतत् ॥ ज्ञानस्य स्वप्रकाशत्वेऽकृता
लीकारे इच्छादिप्रत्यक्षानुरोधेन कल्पनीये आत्मसमवेतप्रत्यक्षे मनःसंयुक्तसमवाययोः कार्यकारणभावे ज्ञानप्रत्यक्षे व्यभिचारः विषयतासंबंधे
न प्रत्यक्षस्यात्मनि उत्पत्तेः तत्राव्यवहितपूर्वक्षणावच्छेदेन मनःसंयुक्तसमवायस्यासत्त्वात् अत आत्मसमवेतेतरज्ञानीयत्वं कार्यतावच्छे
दककोटौ निवेशनीयमिति गौरवं ॥ अथ सामान्यतः आत्मसमवेतमानसत्वेन तत्संनिकर्षजन्यतावच्छेदकं भवेत्तदैवेयमनुपपत्तिः तदेव
न तथा सत्यात्मसमवेतस्य संस्काराद्द्वेषादेरपि मानसप्रसंगात्· अत इच्छामानसत्वादिकमेव विशिष्य संनिकर्षजन्यतावच्छेदकं वाच्यं · त
त्र च न व्यभिचारप्रसंग इति चेत्· इच्छामानसत्वादेर्मनःसंयुक्तसमवायजन्यतावच्छेदकत्वेपि तादृशजन्यतावच्छेदकावच्छिन्नं प्रत्येकं येन संस्का
राद्यनुत्पद्यते· मनःसंयुक्तसमवायस्य तत्तत्र सत्त्वात्· इच्छामानसत्वाद्यवच्छिन्नं प्रति इच्छादिना विषयस्य हेतुत्वकल्पनात् तादृश राम
कारणविरहान्नानुपपत्तिरिति चेत् न तर्हि आत्मसमवेतमानसत्वस्य संनिकर्षजन्यतावच्छेदकत्वेपि इच्छादिरूपविषयोऽवसामग्री विर २

निः [illegible] विषय २ त्वो १

प ३

त्वादेव संस्कारादावात्मसमवेतमानसत्वावच्छिन्नोत्पत्तिर्न संभवतीति कृतमिच्छामानसत्वादीनां संनिकर्षजन्यतावच्छेदकतया। न चेच्छादीनां कारणांतरत्वे
कल्पनापेक्षया इच्छामानसत्वादिना मनःसंयुक्तानुयोगिकेच्छासमवायत्वादिना संनिकर्षस्यैव कार्यकारणभावकल्पने संस्कारादिमानसवारणायो
चितं तथा च ज्ञानस्य स्वप्रकाशतायां नानुपपत्तिरिति वाच्यं। शुद्धरूपभेदभिन्नत्वेन संनिकर्षकार्यकारणभावे विषयविशेषनिवेशापेक्षया विशेषाणां स्वतं
त्रकारणताकल्पने लाघवस्यातिस्फुटत्वात्। यत्तु आत्मसमवेतमानसत्वस्य संनिकर्षजन्यतावच्छेदकत्वे विषयप्रभासकसामग्र्याः सत्वामपीच्छा
दीनां विषयतासंबंधेन तादृशकार्यतावच्छेदकावच्छिन्नोत्पत्तिः। विषयप्रभासकसामग्र्या विनापि तद्धर्मावच्छिन्नस्य सुखादावुत्पत्तेस्तदवच्छिन्नो
त्पत्तौ विषयप्रभासकसामग्र्या विरहस्याकिंचित्करत्वात्। इत्थं तदिच्छामानसत्वादीनां विशिष्य संनिकर्षजन्यतावच्छेदकत्वमावश्यकमिति। तद
सत्। आत्मसमवेतमानसत्वस्य जन्यतावच्छेदकत्वेपि तादृशापत्तेर्विवादसहत्वात्। तथा हि। विषयप्रभासकसामग्र्याः स्वस्य कालेपि तादृश
सामग्रीवत्त्वात्सुखादावात्मसमवेतमानसमुत्पद्यते तादृशसामग्र्याः सुखादिरूपविषयोपि घटकः। सुखादिमानसे प्रति तादात्म्यसंबं
धेन विषयस्य सुखत्वादिना हेतुत्वात्। प्रतीतावपि गुणमानसत्वमेव य ~~[illegible]~~ मनःसंयुक्तसमवायस्य जन्यतावच्छेदकं तथा चैतत्
ज्ञानादिव्यावृत्तमेवोपगम्यते। ज्ञानेन स्वप्रकाशपक्षे ज्ञानादौ व्यभिचारः। नैयायिकमते अनंतानुव्यवसायव्यक्तीनां कल्पनीयत
पात्स्वप्रकाशपक्षे ज्ञानादिशरीरे वैजात्यकल्पनस्य गौरवाप्रयोजकत्वात्। तत्साकारे मनःसंयुक्तसमवायजन्यतावच्छेदकको

प ४

टिोपगमात्। इत्थं चेच्छादीनामात्मसंबंधेन सुखत्वादीनां मानसत्वान्न तादृशसामग्रीति कथमापत्तिः। केचित्तु

३ दिप्रविष्टविषयस्य गुणत्वाज्ञात्मसमवेतत्वेनाविशेषात् तथापि लाघवात् अथ विजातीयगुणसमवेतमानसत्वस्य संनिकर्षजन्यतावच्छेद
कत्वे आत्मत्वमानसासंग्रह इति चेत् का क्षतिः न हि तन्मानसत्वस्य संनिकर्षजन्यतावच्छेदकानाक्रान्तत्वे संनिकर्षं विनानुत्पत्तिरिति वक्तुं शक्य
ते यतो ज्ञानसामान्यसामग्र्या दशायां आत्मत्वे मनसः संनिकर्षएव दुर्वचः अथैवमात्मसमवेतगुणमानसेपि संनिकर्षहेतुत्वकल्पने मनसर्ष
कं ज्ञानसामान्यसामग्रीदशायां विषयसत्वे तत्रापि मनःसंनिकर्षस्यावश्यकतया ऽन्वयव्यतिरेकाभावात् इति चेत् पुरुषान्तरसमवेतगु
णस्य पुरुषान्तरेण ग्रहणवारणाय गुणविषयक नन्तु रूपवीपमानसे तन्मनःप्रतियोगिकविजातीयसंयोगवत्समवायत्वेन हेतु
ताया आवश्यकत्वात् न च विजातीयगुणमानसत्वस्य मनःसंयुक्तसमवायजन्यतावच्छेदकत्वे आत्मविषयिताया अनियन्त्र
णात् तन्नियामकाभाव इति वाच्यं निर्विकल्पज्ञानानामेवात्मविषयकतया ज्ञानसामग्र्या एव तन्नियामकत्वात् वस्तुतस्तु आत्मत्वावच्छिन्नवि
षयताशालिबुद्धौ न मानसत्वावच्छिन्नं प्रति मनःसंयोगस्य हेतुत्वे कल्पनागौरवं मानसत्वस्यानीयं आत्मत्वमेव विषयितासंबंधेनं कार्यताव
च्छेदककोटौ आत्मत्वविषयिताया अनिवेशेन तत्साक्षात्कारनियामकत्वं संभवतीति तस्या निवेशो न तु अवच्छेदककोटौ गौरवमपि तथापि परास्तमित्याहुः ॥
तदसत् गुणगतजातिमनन्तसाक्षात्कारसामान्यकारणतां इच्छादौ वैजात्यकल्पनस्यासंभवात् न चेच्छादौ संनिकर्षजन्यतावच्छेदककोटि रा
निविष्टतया स्वजन्योपाधिविशेषएव स्वीकरणीयः अस्वजन्योपाधिकल्पने गतेषामप्रसिद्धेः गन्धत्वमधुरत्वाद्यनन्तैरुपाधिष्वोपगमादि ३

८ कार्यतावच्छेदकमुपेयते एवंच मनःसंयोगएव तत्तद्विषयितानियामकः। एतेन ज्ञानसामान्यस्य ला म

तिवाच्यं। अनुगतप्रतीत्यनुपपत्तिं विनाकार्यतावच्छेदकतया एवं ज्ञे प्राप्तिस्वीकारस्याप्यावश्यकत्वासंभवत्वात्। अन्यथा बहुतरातिप्रसंगा
पातात्। वार्यतया वा विजातीयात्मगुणस्य स्वजातीयेन तावच्छेदकत्वमुपगम्य मनःसंयुक्तसमवायस्य हेतुतायां व्यभिचारः। एवमपि मनःसंयुक्तसमवेतविशेषणताया
इच्छादौ विषयित्वादिप्रत्यासत्त्यानुरोधेन कल्पनीयत्वे तु तादृशज्ञानविषयितादिप्रत्यासत्तेर्व्यभिचारः। अहितत्वविजातीयगुणवृत्तिप्रत्यासत्तिवादेर्जन्यता
वच्छेदकत्वमुपगम्यते तत्र व्यभिचारः शक्यते वारयितुं। यतो ज्ञाने ऽर्धवृत्तिविषयिताऽभेदे मानाभावेन इच्छादिरूपविजातीयगुणवृत्तिविषयिता
एव ज्ञाने भासत इति। अत्रोच्यते। अव्यवहितपूर्वक्षणावच्छेदेन ज्ञाने मनःसंयुक्तसमवायस्याविरहेऽपि न व्यभिचारः संभवति। तथाहि। अव्यवहि
तपूर्वक्षणावच्छेदेन ~~एवच्छिन्नाव्यवहितपूर्वक्षणावच्छेदेन~~ न कार्याधिकरणावृत्तियोऽभावस्तत्प्रतियोगितानवच्छेदकमवच्छिन्नत्वरूपव्यापकत्व
मेव कारणताघटकं। तद्धि घटकत्वं तत्कार्यतावच्छेदकावच्छिन्नाव्यवहितपूर्वक्षणावच्छेदेन तदधिकरणवृत्तियोऽभावः कारणतावच्छेदकावच्छि-
न्नप्रतियोगितावच्छेदकत्वमेव व्यभिचारः। एतादृशाव्यभिचारेण प्रकृते स्वाव्यवहितपूर्वक्षणावच्छेदेन ज्ञाने मनःसंयुक्तसमवायस्यैव तद
भावस्याप्यसत्वात्। अव्यवहितपूर्वक्षणावच्छेदेन स्वस्मिन्मनःसंयुक्तसमवायत्वप्रतियोग्यसत्त्वेन तदभावसत्त्वे बाधकाभाव इति तु ना
शंकनीयं। यतोऽव्यवहितपूर्वक्षणावच्छेदेन स्वस्मिन्मनःसंयुक्तसमवायो न वर्त्तते इत्यत्र स्वाव्यवहितपूर्वक्षणस्यावच्छेद्याधिकरणान्य
तया असंबद्धतया स्वनिष्ठमनःसंयुक्तसमवायवत्तानवच्छेदकत्वमेव वाच्यं। एवं च तत्स्वनिष्ठाभावावच्छेदकत्वमपि न संभवति। निकसत

नं१ समवेता२

४ द[illegible]वच्छेदेन तदभावः स्वस्मिंश्च वर्त्तते अत एव चेच्छाविषयीभूतानागतपाकादौ तदव्यवहितपूर्वक्षणावच्छेदेन विशेष्यतया ज्ञानासत्त्वेपि र
च्छाज्ञानयोः समानविशेष्यतया पाकार्यकारणभावो निर्वहति एवं ज्ञानेच्छयोर्विषयिताप्रत्यासत्त्ये मनःसंयुक्तविशेषणताया हेतुत्वे व्यभिचार इत्य
पि नाशंकनीयं यतस्तादृशविशेषणताया हेतुत्वमेव गुरुमतेऽसिद्धान्तथा हि। यदा च्छादौ विषयिताप्रत्यासत्तिर्मते स्यात्तदैव तद्धेतुत्वम्प्रा
भाकरैः कल्प्येत तदेव। विषयानिश्रितविषयिताप्रत्यासत्त्यानुभवात् घटादि[illegible]दिरूपविषयानिश्रितप्रत्यासत्त्यैव च ज्ञानलक्षणायाः प्रत्यासत्ति
त्वेमनभ्युपगन्तां तेषां घटादेरन्तःकरणायोग्यत्वेनासम्भवात्। तथा चेच्छादिप्रत्यासत्त्यस्थले तद्विषयीभूतघटादेस्तत्स्वत्वाभानेदकादौत
दसंसर्गाग्रहाधीन एव घटमिच्छामीत्यादिविशिष्टव्यवहारः। गुरुमते तापपापानरजतभेदाग्रहाधीनेदंरजतमित्यादिव्यवहारवत्। इत्थं चैवर्तेरुपगन्तव्यान २६
याचालम्मनःसंयुक्तसमवेतविशेषणताहेतुतया। न चैवेच्छादिष्टत्वभावप्रत्यक्षानुरोधेन तद्धेतुत्वकल्पनमावश्यकमिति वाच्यं। अधिकरणस्व
रूपाभाववादिनां गुरूणां इच्छादिष्टत्वाभावस्येच्छादिरूपतया मनःसंयुक्तसमवायस्यैव तत्राम्भकत्वात्। अथैवमपि इच्छात्वादिप्रत्यक्षानुरो
धेन आत्मसमवेतसमवेतमात्रस्यातावच्छिन्नं प्रति मनःसंयुक्तसमवेतसमवायस्य हेतुतया आवश्यकतया तत्र[illegible] ज्ञानत्वादिम
त्यसे व्यभिचारः। विषयतालक्षणकार्यतावच्छेदकसंबंधेन कार्याधिकरणे ज्ञानत्वादौ तदव्यवहितपूर्वक्षणावच्छेदेन मनःसंयुक्तस
मवेतसमवायाभावसत्त्वात् तदभावप्रयुक्तहानौ तद्धटकीभूतसमवेतविरहप्रयुक्त एवानवसमवेतोपलक्षितसमवाय एव हेतुः। स च स राप
मवेतविरहेपि वर्त्तते एवेति न व्यभिचारः। उपलक्षणतया पत्करणतावच्छेदकघटकं कार्यान्तु ज्ञानत्वादेस्तत्त्वस्यकारणताविघट ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कत्वे परामर्शादिकारणतावच्छेदककोटिप्रविष्टानां विषयादीनामनुमित्युत्पत्तिप्राक्काले नियतसत्त्वाविरहात्तेषामनुमितिहेतुताविलयप्रसंगादिति
कार्यासमवेतोपलक्षितसमवायसम्बन्धेन तत्वे इष्टाघसत्त्वकालेपि दर्शत्वादिप्रत्यक्षापत्तेरिति। तस्मात्समवेतोपलक्षणत्वाभावात् ज्ञानत्वादिप्र
त्यक्षे मनःसंयुक्तसमवायहेतुतायां व्यभिचारो दुर्वार एवेति चेत् न। अनायत्या मनःसंयुक्तसमवायजन्यतावच्छेदककोटिप्रविष्टात्म[illegible]सम
वेतसमवेतरूपविषयीरीत्या आत्मस[illegible]मवेत[illegible]त्वलिंगेनान्वय[illegible]भिचारः। इदं च गौरवमकिंचित्करमेव। स्वप्रकाशमतेऽवकुंतरलाघवस्य
वस्य प्रामाण्यात्॥ अस्मे तु॥ [illegible] आत्मसमवेतसमवेतमानसत्वमेव संनिकर्षजन्यतावच्छेदकं घटादिगोचरव्यवसायस्य च ज्ञानत्वाघवगा
हित्वेपि तत्र मानसत्वानभ्युपगमान्न व्यभिचारः। मानसत्वं तु जातिः। परमते गुरुत्वं तु गंधत्वादिवद्द्रव्यं जोपाधिरित्येव विशेषः। घमिलि पुरुषा
योरेवाविवादः। एवमप्यहं सुखीत्यादिमानसस्यापि स्वप्रकाशतया तज्ज्ञानित्वादिज्ञानात्व्यभिचारस्य धरहति तु न आशंकनीयं यतः कार्य
तावच्छेदकावच्छिन्नमात्रे चिद्ध्वंसे पौर्वरधिकरण्येनावच्छेदकावच्छिन्नानामसत्त्व एव व्यभिचारः प्रसज्यते। न तु यत्किंचिदधिकरणे तथा सति क्रिया
संयोगादीनां हेतुहेतुमद्भावविलयप्रसंगात् तथा च विषयतासंबंधेन तदहंशामानसादधिकरणे सुखत्वादावनवच्छिन्नप्राक्काले तादृशकारणा
सत्त्वात्तद्विषयकानस्य जन्यत्वादौ तदसत्त्वेपि न व्यभिचार इत्याहुः॥ अथ घटादिगोचरचाक्षुषादेर्व्यवसायवहित्वे घटं पश्यामीत्यादिप्रत्यय
वत्तद्विषयानुव्यवसायाकारकप्रत्ययः। पश्यामीत्याद्याकारकप्रत्ययानां लौकिकविषयत्वाद्यवगाहित्वे पात्तानादौ लौकिकविष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तर कद

५ यतानभ्युपगमात्तनताद्दशप्रत्ययप्रतितुनया ख्यातात्मनाद्रौ लौकिकविषतोपेनभ्युपगमेघटंपश्यामीत्यादिप्रतीत्यनुपपत्तेरिति॥अत्रकेचि
त॥चाक्षुषत्वादिकं गुरुमतेनजातिः तेषां तु लाघवेनात्यन्ताभ्युपगमात् परंतु अखंडोपाधिरेव गंधत्वादिवत् कश्चित् एवं च चाक्षुषत्वादे
रव्याप्यवृत्तित्वमेवोपगम्यते॥ जातेरेवानां शिकत्वोपगमात्तात्ताखंडोपाधेरिति॥ तथा च घटादिगोचरचाक्षुषादेर्घटादिरूपविषयां
शएव चाक्षुषत्वादिकं स्वीक्रियतेतत्तु नाघंशेतु प्रत्यक्षत्वादिकमेव नतु चाक्षुषत्वादिकं अतो न ताननं पश्यामीत्यादि प्रत्ययः न
तद्विषयाभिन्नतपश्यामीत्यादिप्रत्ययस्य तन्निष्ठविषयावच्छिन्नचाक्षुषलाघवमाक्षित्वादितिसमादधिरे॥ वस्तुतस्तु॥चाक्षुषत्वादेरनां
शिकत्वेपि चाक्षुषत्वावच्छिन्नविषयतयातानादिप्रकारस्य तान्नं पश्यामीत्याकारकप्रत्यक्षस्यासिद्ध्या नापत्तिः संभवतित
यावि धानुमित्यादिकं पुनः सामग्न्यां तेदृष्टमेव॥ अथैवमपि चाक्षुषत्वादेरनांशिकत्वेतान्नं पश्यामी तन्मनस्तस्यापि स्क्का
पत्तिसंभवति तत्पावि धानुमित्यादिकं पुनः सामग्न्यां तेदृष्टमेव॥ अथैवमपि चाक्षुषत्वादेरनांशिकत्वेतान्नं पश्यामीत्यादिकाया
नांयोग्यायेकत्वापत्तिर्दुर्वारैवेति चेत्र चाक्षुषत्वादेरनांशिकत्वेपि ताद्दशापत्तिसद्भवस्यैव॥ ताद्दशावाक्यजन्यबोधेन चाक्षु
षत्वादिकिशिष्टज्ञानादिनिरूपितलौकिकविषयत्वावगाहनात् तस्य च तत्र गुरुमते अवाधात्॥ नचैताद्दशान्तपातत्रोच्चयामसंभ राम
वात॥ अथघटादीनां चाक्षुषत्वाघवच्छेदकत्ववत्ताद्दृषपितानामपि तथात्वमपेयतेएवंयावमन्नमर्थज्ञानादिविषयि ५

सप

२ वाक्यजन्यबोधेदृशानार्द्धशावच्छिन्नत्वेचाक्षुषत्वादेभासतेतस्त्रितत्रबाधितमेवेतिनदोषइतिवाच्यं चाक्षुषत्वा
दिः पदार्थैकदेश२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तायास्त्वावच्छिन्नचाक्षुषत्वादिमत्त्वसंबंधेनैव धात्वर्थस्य प्रत्यक्षत्वादिविशिष्टे अन्वयः स्वाश्रयत्वेन स्वरूपेण संबंधेन॰ एवं च ज्ञानादिवि
षयितायाश्चाक्षुषादेः स्वावच्छिन्नचाक्षुषत्वादिमत्त्वसंबंधेन बाधान्न तादृशप्रयोग इति चेन्न चाक्षुषत्वादीनां घटादिरूपवस्तुविषयीभू
तविषयतानिरूपकतावच्छेदकत्वमेव स्वाश्रयतेन ज्ञानादिनिष्ठविषयतानिरूपकतावच्छेदकत्वं एवं च चविभक्त्यर्थतत्तद्विषयनिष्ठविषयता
यां चाक्षुषत्वाद्यवच्छिन्ननिरूपकत्वसंबंधेन चाक्षुषत्वाद्यवच्छिन्नस्य प्रत्यक्षस्य ज्ञानादिविषयतायां तेन संबंधेन बाधान्न तादृशप्रयोगः अथ ज्ञानमा
त्रस्यापि तन्मात्रादिविषयितायाः क्रियाप्रकारकं ज्ञानसामान्यसामग्रीभिति मात्रादिविषयितायामात्ममनोयोगाद्यात्मककारणसामान्यसाम
नं ६ सामग्रीजन्यतावच्छेदकत्वात् एवं तु योग्येतरजन्यतावच्छेदककोटौ निविष्टमात्रादिविषयितानिवेशोपि स्वपमेव स्वविषयोन्तु निरूपितत्वसंबन्धेन विषयिता
त्रनिरूपकाभावं तत्तज्ज्ञानविषयकत्वं ज्ञानत्वस्य जन्यतावच्छेदकत्वे च ज्ञानिभेदे ज्ञाने न कार्यकारणभावप्रसङ्गः अन्यथा तत्तद्व्यक्तित्वा
वच्छिन्नोत्पादकसामग्रीनां तत्तज्ज्ञानस्य तत्तज्ज्ञानविषयितानिरूपकत्वेनैकज्ञानस्याथ ज्ञानविषयितायां तादृशीव सामग्रीतत्तद्व्यक्तिस्व
रूपाभावतत्तद्व्यक्त्यव्यवहितपूर्ववर्त्तिक्षणोत्पन्नमनोयोगादिरूपा अथ तत्तज्ज्ञानविषयितायास्तादृशसामग्रीजन्यतानवच्छेदकत्वाल्ले
तस्यास्तदवच्छिन्नोत्पादनिरूपकत्वासंभवात् तत्तद्व्यक्तिविषयित्वमपि तज्जन्यतावच्छेदककोटौ निवेश्यं एवं वा नन्वस्तु लेऽवच्छेद
कगौरवं न तत्र वैतोपि तादृशसामग्र्यास्तत्तद्व्यक्तित्वं जन्यतावच्छेदकं वाच्यं ज्ञाननिष्ठतत्तद्व्यक्तित्वं ज्ञानव्यक्तिस्वरूपमेवाक्लृप्त

कवि१

स्यात्पसद्दुर्वत्वान्। अतिरिक्तपदार्थस्याप्रामाणिकत्वात्। एवं च तत्तत्ज्ञानस्वरूपस्य तत्तद्व्यक्तित्वस्य लौकिकविषयतासंबंधेनैव जन्यतावच्छेदकत्वमु
पेयते न तु स्वरूपसंबंधेनैव न। तावच्छेदकगौरवं इति वाच्यं। विषयतासंबंधेन तत्तद्व्यक्तित्वस्य तत्तद्व्यक्तिसामग्रीजन्यतावच्छेदकत्वेनासंभवि स्वरूपसं
बंधेन तत्तद्व्यक्तित्वावच्छिन्नो [struck] कोत्पत्तिनियामकत्वानुपपत्तेरिति चेन्न। यादृशसामग्रीघटककारणजन्यतायां येन संबंधेनावच्छे
दकीभूतधर्मः सामग्र्या तेन संबंधेन तदवच्छिन्नस्यैकोत्पत्तिनियामकत्विनायमः तथासति घपाहिसामान्यायटमिन्नमिन्नत्वघटवत्प्रकारकप्र
विशेष्यताघवच्छिन्नोत्पत्तिनियामकत्वाद्भसंगात्। अपितु यत्सामग्रीघटकहेतुजन्यता [struck] वच्छेदकनिवत्तावच्छ
सामग्र्या तदवच्छिन्नस्यैवोत्पत्तिनियामकेति नियमः एवं च तत्तद्व्यक्तिविषयकत्वस्य तत्तद्व्यक्तिसामग्रीघटकतत्तज्ज्ञानजन्यतान वादि६
वच्छेदकत्वेपि तस्यासंहवच्छिन्नोत्पत्तिनियामकताविरहेपि वेति वदंति। अपरे तु। ज्ञानहृत्तिलौकिकविषयतासंबंधेनज्ञा
नत्वावच्छिन्नं प्रतिप्रतियोगितासंबंधेन ज्ञानप्रागभावत्वेन हेतुता [illegible] एवं च नदूषाहितत्वाभ्यासान्यसामन्येवज्ञानस्य ज्ञानविषयकत्वेति
वाहिक्या एवं चातीतज्ञाने प्रतियोगितासंबंधेन प्रागभावविरहे [illegible] ज्ञानविषयकत्वस्य कारणसंभवे विभावविषयकत्वमात्रमवच्छिन्नो
तेवारपि तु तदपि प्रागभावत्व हृत्ति प्रतियोगिकतासंबंधेन हृत्तिवैशिष्ट्यं विशेषेव वारणीयं स्वहृत्तित्वं चकालिकसंबंधेन। नाप्रि एप
तत्वेत्तानगतेत्यन्येनाहुः संबंधेन हृत्तिविशिष्टप्रागभावप्रतियोगितासंबंधेन तत्त्वत्वं ज्ञानोत्पत्तेः तत्पत्वां [illegible] भावेन ज्ञानेन ज्ञान ६

गर गध ग३ ति१ वि३
गर१ ग१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङ्कितप्रदर्शितसंबंधेनैव नालिङ्गते द्वि लक्षणमात्रावच्छिन्नप्रतियोगितादानीं नन्वेवं कालिकसंबंधेन घटतोयादि लक्षणमन्वयपदार्थस्याद्व्यंशे नवप्राणभाव
स्य हेतुत्वे कारणमात्रस्य कार्यसहभावेन हेतुतेति साध्यकारणतासिद्धौ तोयस्येतितथा विघटेतुकल्पनेनेसंभवतीति वाच्यं तादृशप्रवाहस्या
गभावे तत्कारणप्रसक्तावत्र प्रतियोगिनिष्ठप्रत्यासत्तिप्रतियोगिप्रागभावयोः कार्यकारणभावो न संभवतीति तथा हि। कारणत्वं स्वाव्यवहित
पूर्वक्षणावच्छेदेन कार्याधिकरणवृत्तिर्योऽभावः स प्रतियोगितानवच्छेदककार्यच्छिन्नत्वरूपव्यापकतावृत्ति
तं। न चैतादृशव्यापकता प्रकृते संभवति। कार्यतावच्छेदकसंबंधेन कार्याधिकरणे स्वस्मिन् स्वाव्यवहितपूर्वक्षणावच्छेदेनवर्त्त
मानस्य स्वध्वंसाभावस्येवाप्रसिद्धेः। न हि स्वनिरूपितवृत्तौ स्वात्मकावच्छेदाधिकरणसंबंधित्वरूपं क्षणावच्छेदकीभवितुमर्हतीति
ति चेन्न उपदर्शितव्यापकत्वे नैकारणताघटकत्वप्रत्यासत्तिविषयताप्रत्यासत्त्या तान्नेच्छादीनां हेतुहेतुमद्भावविलयप्रसंगा
त्। अत्र तागत सैवेच्छादिविषयतया। कार्यतावच्छेदकसंबंधेन कार्याधिकरणे कार्याव्यवहितपूर्वक्षणावच्छेदेन वर्तमानस्याभावस्या
प्रसिद्धेः ॥ अपि तु स्वाव्यवहितपूर्वत्वोत्पत्तिकत्वकार्यकारणभावघटकप्रत्यासत्तिघटितसामानाधिकरण्योभयसंबंधावच्छिन्न
प्रतियोगितावच्छेदकताककार्यनिष्ठभेदप्रतियोगितावच्छेदकतानवच्छेदकधर्मावच्छिन्नत्वरूपव्यापकत्वमेव कारणत्वं संबंधोपद
र्शितकार्यनिरूपितव्यापकत्वं प्रागभावस्यापि संभवति प्रागभावेतरादिमद्भेदस्यैव तथाविधान्यकार्यप्रतियोगिकस्य प्रकृते कार्य

क ३

धिकरणक्षणावृत्तितोत्पत्तिरणो ३

वृत्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे:२ त्वे२

६ निष्ठसप्रसिद्धेः ॥ अथैवमपि स्वव्यधिकरणस्वसमवेतलौकिकज्ञानविषयत्वं तावदस्य दुर्वारमेव तत्रापि स्वाव्यवहितपूर्वक्षणावृत्तितादृशविशिष्ट
प्रागभावरूपकारणसत्त्वादिति चेन्न पुरुषान्तरीयज्ञानगुरुकान्तरेणास्यादृष्टकारणतापन्नसमवेतवृत्तिविषयतासंबंधेन तत्तद्रूपीयमानसत्ता
वच्छिन्नं प्रति तन्मनःप्रतियोगिकविजातीयसंयोगावत्समवायत्वेन तन्निकर्षसमवेतत्वसंबंधेन तादृशात्मन एव हेतुत्वं भवतापि कल्प
नीयं तच्च तादृशकार्यकारणभिन्नत्वादेव न स्वव्यधिकरणज्ञानस्य स्वविषयत्वप्रयोजकत्वप्रसङ्ग इति । अथ पत्ततत्तत्क्षणवृत्तितत्तत्पुरुषी
यमनःसंयोगादिघटितसामग्न्यापत्त्रत्तत्तदृशमन्त्वाणुव्यावृत्ततद्विषयत्वासारूप्यकार्ये विषयतासंबंधेनोत्पद्यते इत्यतादृशोऽवेन्म
नःसंनिकर्षादिघटितसामग्रीव्याप्तिरूपमेवं गम्यते तत्र तानीतानागतानामपि रूपादीनां तासोन्मातित्वरूपणएव वा तेषां तादृशसाम
ग्रीवलात्प्रत्यक्षापत्तिः ॥ अतोऽवच्छेदकत्वमन्तर्भाव्य तत्र तत्क्षणावच्छेदेन तन्मनःसंनिकर्षादिघटितसामग्र्यधिकरणत्वेऽपि वृत्ति नच ५
त्वविमतक्षणावर्त्तितद्विषयप्रत्यक्षस्वरूपकार्यं विषयतासंबंधेनोत्पद्यते तेन तादृशसामग्र्याः स्वीकरणीयाः एवं वाच्यवाहित
पूर्वक्षणावृत्तित्वादृशसामग्र्यधिकरणत्वमेव विषयतया प्रत्यक्षरूपकार्यप्रयोजकं न तु स्वाव्यवहितपूर्वक्षणावृत्तिसाम
ग्रीसत्त्वमात्रं तादृशप्रयोजकं किं तु तादृशस्य विषयवैलक्षण्यं व्यधिकरणज्ञानस्यापि वेत्तस्य विषयत्वमिव स्वस्य व्यधिकर णम
णस्यापि विषयत्वं दुर्वारमेव । यदि वा विषयरूपकारणविरहेणातीतानागतेच्छादौ लौकिकप्रत्यक्षसंभवश्चाप्यवच्छेदकं नत ७

तदा स्वस्येयत्कथं त्वद्विषयता तादृशप्रयोग
कदिरहस्य स्वास्मिन्नप्यविशेषात् २ त्वा २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क ६

[illegible]वे नैवोपदर्शितसामग्न्या व्याप्तिरूपगंतव्येति मन्यते तत्राप्यनिस्तारः पक्षे विषयस्य हेतुतो व्यापकत्वे न विषयस्यापि सामग्र्यां व्याप्यत्वानु प्र
वेशनीयत्व प्रसंगात् शब्दसामग्र्या विरुद्धस्यापि स्वसाधारणतया स्वविषयकरणात्मनस्सद्विषयतावच्छेदकत्वं न संभवतीति मैवं उपदर्शितमन
[illegible] तन्निवेशो विवक्षित [illegible] सामग्र्याज्ञाने च्छादि प्रत्यक्षनिवेशे हि कार्यैकार्थस्य विरुपेयते यतः प्रत्यक्षानुपपत्तिः स्यात् अपितु ज्ञान प्रत्यक्षनि
वेशे [illegible] काचित्कार्यैकदेशः [illegible] सा निर्वह्नि कांतज्ञानप्रत्यक्षनिवेशे [illegible] व्याप्तो नावच्छेदकत्वभावइति अत एव ह्येतत्सर्वत्तरणाद्
ति [illegible] सामग्र्याः स्वविषयज्ञानसमत्वविषयतासंयोजकरूपस्य [illegible] नवलीला नागतज्ञानेषु नवेच्छादौतत्राव्यवहितप्राक्काल
वृत्तित्व [illegible] विशिष्टज्ञानप्रागभावरूपतादृशसामग्रीघटककारणस्य प्रतियोगिता लक्षककारणतावच्छेदकस्वसंबंधविरहात नापि स्वव्याप्यकार
णेषु स्व [illegible] तच्छेदक [illegible] तानेषु तादृशसामग्री घटकस्य तत्तु [illegible] त्वसन्निकर्षस्याधेयता संबंधेन [illegible] विरहात [illegible] स्वव्याप्यकारणेषु सत्व
[illegible] चित्कार्यहेतुत्वइच्छादिप्रत्यक्षानुरोधेन कल्पनीये व्याप्यत्वरेखा [illegible] . भी वोविषयानुप्रवेशेवाकरणाप
त्तेस्तीत [illegible] तत्कालात्कावच्छेदकसोपत्तौ तदा तत्संप्रत्यसा पत्ते तादृशसामग्रीवल्लादौच्छादेरिव ज्ञानस्यापि छितोप
[2] तेषु यत्राविषयत्वा विनाचार्ये नीपंयतां त्तानाम्प्रत्यक्षत्वे विषयतासंबंधेन मानसलावच्छिन्नप्रतिज्ञानभेदेनापि हेतुतापा [illegible] त्वनोपत्त मात्रतादृ
शसामग्र्या व्याप्तो ज्ञानभेदस्यापि निवेशेन ज्ञाने भेदाभावत्ता दृशसामग्र्याः स्वि वस्तुतो ज्ञानानां प्रत्यक्षत्वे ज्ञानभेदस्य हेतुत्वैकस्य नेष्यपि न

शा २ नी ले २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२५ मितिर

ति इपतोत [illegible] पात्मिगुराप्रसेप्सेवाररााापमानं संप्रति इच्छ्रि योगपपुरााकामिच्छात्वादिनाहेतुत्वकल्पनस्यावश्यकतयाप्रद [illegible] वच्छिन्नतामिवट [illegible] ग्या सौतिवे
शनीयतेया [illegible] नेपु [illegible] त्मरूपकाररातावच्छेदकप्रत्या सत्याइच्छा [illegible] नाम सत्वानाइ शसामग्री त्वानेपुनात्नीति न होष ४। अपे [illegible] इयाइ [illegible] सकला
लिप्रस [illegible] ताव [illegible] पिस्वप्रकाशमतेउ परश्रितेति विशिष्ट [illegible] ताम्प्रा वत्वेन कारणताक ल्यनाधिक्यं वात्सत्वं एतन्मते एक कारणता
पिक्वं नैयायि [illegible] नेनकारणतापा४ कात्पनमितिगौरवंतथाहि तन्मते पे घटइत्याकारके रं त्वाघवच्छिन्नविषयतानिरूपितघटत्वप्रका
शालि [illegible] नेरमिवापं घटत्वेति समवाय लंबनानन्तमिरे त्वादिप्र [illegible] विशिष्टविषयकज्ञानहपानं तरं चकथमित्यघटत्वेन ज्ञानाम [illegible]
रवं इ [illegible] विशिष्ट विशेष्य विशेष्यकत्वावच्छिन्नघटत्वमिप्रकार [illegible] प्रकारमिपा [illegible] ज्ञानामात [illegible] कं प्रत्यक्षं कथं नतायतेस्य
म [illegible] नताथामादिषविशिष्टामग्यासत्वापिसत्वात् [illegible] वच्छिन्न [illegible] तानिरूपितघटत्वादिप्रकारताशालि [illegible]
[illegible] ताहक्सामग [illegible] तिवेत्वे न हत्येव [illegible] हेतु [illegible] विषयत्वेन ज्ञानत्वेन वा तर्हि तद्वच्छिन्नत्वस्यत त्र सत्वात्कथं
[illegible] तावच्छेदकीभूततायावत्वेनप्रत्येकंतद [illegible] वच्छिन्न [illegible] वच्छिन्नव्यक्तिविषय [illegible] विटं
प्रसूतेसामग्री [illegible] यतिताहशानुव्यवसायप्रति इदं त्वावच्छि [illegible] ताकघटत्वादिप्रकारकोनिरूपकव्यवसायोहेतुरिति
[illegible] सतासिद्धौ कारणतानामेवा [illegible] वच्छिन्न [illegible] घटइत्याकारके रं त्वावच्छिन्नविषयताकघटत्वादि

तर्हिगुरु ताहशा अप पदि४ के र

व्यासज्य हेतुत्वं कल्पनीयमिति लाघवान्नवकाश १ सोकारकत्वे १ इति चेन्न गुरुमते इदं त्वविशिष्टविशेष्यक त्वावच्छिन्नघटत्वप्रकारकत्वादि २

१६ ग२

प्रकारकज्ञानस्येव घटत्वेन जानामीति व्यवसायस्यैव हि कुतः इदंत्वावच्छिन्नविशेष्यतावच्छिन्नघटत्वप्रकारकत्वादिप्रकारतानवच्छिन्नप्रत्यक्षत्वं
वनाहि इतिमिति व्यवसाये निर्वाहात् विशेष्यतासंबंधेन ताहृशघटत्वादिप्रकारत्वादिमत्त्वाया आघटत्वप्रकारकत्वाप्रत्यक्षाभावत्वेन प्रति-
योगितायां प्रकारकप्रत्यक्षत्वस्य इदंत्वावच्छिन्नविशेष्यतानिरूपितघटत्वप्रकारता [illegible] ताहृशप्रत्यक्षत्वावच्छिन्नो यस्तत्त्वापकथ
नावच्छिन्नसामग्र्यादिभयादिदंत्वावच्छिन्नत्वाविशेष्यकघटत्वादिप्रकारकज्ञाने सामग्र्या प्रतिबंधेनैव ताहृशप्रत्यक्षत्वं नादि प्रामाण्यलेवनत्यविध
व्यापकत्वसामग्र्या विरहान्नताहृशप्रत्यक्षत्वं नादि इदंत्वविशिष्टविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वादिप्रकारकतेति नविषं
कारणताकुल्यं नमिति [illegible] व्यापकमतेव अनुमितित्वं नमिति वह्निमान्पर्वतो घटवानित्याकारकव्याप्यवह्निव्याप्यहेतुप्रकानुमित्यनुद्देश
पि वाधाभावादि घटितसामग्र्यो वलात्पर्वते वह्निमनुमिनोमीत्यनुव्यवसायकारणापत्ताहृशानुव्यवसायं प्रति पूर्वतत्त्वावच्छिन्नोद्देश्यकवह्निः
घटावच्छिन्नविधेयकानुमित्यादिरूपव्यवसायस्यैवहेतुत्वमधिकं वह्निल्पनायां गुरुत्वानुपर्वतो वह्निमानित्याद्यनुमितेरेव पर्वते वह्निमनुमिनोमीत्या
द्याकारकतत्पर्वतो वह्निमानित्याकारकानुमितिसामग्र्या व्यापकसामग्री विषयपर्वते वह्निमनुमिनोमीत्येताहृशप्रत्यक्षोत्पत्त्यापत्तेः
तयार तोवह्निमान्पर्वतो घटवानित्याकारकानुमितिं प्रति विरहेणैव नतां सांत याकारत्तेति अधिककारणताकल्पनं विनैकोप
पत्तेः अत्र यथार्थवक्ष्याले तान्नरूपविशेषणज्ञानविरहात्सकथमात्माभाषणाघेन्नत्तज्ज्ञानानां स्वविषयतावच्छिन्नविशेषणत्वादिकेष्वद्वि

विशे १ या १ पं १ पदि १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यनुभवप्रमात्र्   पगमेप
नियमर   त्वोर

पसन्निकर्षादितपर्वविशिष्टहेतुमनुत्पत्तिर्विशिष्टबुद्धिसामान्ये विशेषणज्ञानस्य हेतुत्वमप्रामाणिकमिति मन्यते तथापि कदाचित् जाति मात्र
त्राकारिका कदाचिज्जातिमान्य इत्याकारिका घटत्वादिविशिष्टबुद्धिरित्येतादृशं निर्विकल्पकं हेशेन्याप्रकारकं तद्विशिष्टबुद्धौ तद्धेतोऽस्मा प्रका
रकतद्विषयकज्ञानत्वेन हेतुत्वमनिष्ठं [illegible] सीकारेपि न व्यभिचारः ज्ञानाराधकालानव्यवसायेज्ञानत्वाद्यहेः स्वरूपको विशेषणतासेम
तृ५ र्वख्यवसायस्य घटमहं जानामीत्याद्याकारकत्वेन्नुपपत्त्या तथाकारकोनुव्यवसायोऽवश्यमुपगंतव्यः नचानुव्यवसाये ज्ञानत्वादिनास्फुरप
तो विशेषणतया भानेपि स्वेवानुपपत्तिरिति वाच्यं ज्ञानत्वेन ज्ञानत्वादिनिर्विकल्पकेनानुपपत्तस्याभावात् तन्न चान्वयानिर्विकल्पकोपगमे ज्ञाना
मीत्याकारकानुव्यवसायोपपत्तिकाले व्यवसायनाशात्तादृशानुव्यवसायानुपपन्न इति वाच्यं विषयस्य कार्यसहभावेन हेतुत्वान प६
भ्युपगमात् कार्यकाले व्यवसायसत्वेपि तादृशानुव्यवसाये बाधकाभावात्पत्तु पचहृशीतनि ष्प्रमाणं वर्हिापत्तौ घटत्वादिविशिष्टबुद्धौ
दि४ स्वरूपतो घटत्वादिज्ञानस्य हेतुत्वापेक्षसामान्यस्यापि ज्ञानत्वादिविशिष्टबुद्धौ ज्ञानत्वादिज्ञानहेतुर्विकल्पनल्लघ्मनर्थकंमनुरूपमतान्निर्वि
ल्पकापेव ज्ञानानामञ्ज्ञानामीत्याद्याकारकतया स्वरूपतो ज्ञानत्वाप्रकारकबुद्धेरेवासत्वात्तादृशाकारकत्वाकल्पने अनुपप प-
त्त्यभावादिति प्रपञ्चं ज्ञानत्वाद्युपस्थितिमंतरेणापि व्यवसाये स्वरूपतो ज्ञानत्वादेर्विशेषणतया भानेपि बाधकाभाव इतितत्र ताप
विनाविशेषणज्ञानस्य विषयप्रभेदेन कारणतापेक्षापगमे तत्समाधानमुपपद्यते तत्र देवनतथात्वसाज्ञानत्वकारणत्वकल्पने नम ६

त्वे४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संयोगेन गौरवात्परं तु सामान्यतो विशेष्यतान्यप्रकारतासंबंधेन ज्ञानं प्रति विशेष्यतान्यविषयतासंबंधेन ज्ञानत्वेनैव ~~[illegible]~~ वि
षयमात्रनिवेशे विषयनिष्ठप्रत्यासत्त्या हेतुताभ्युपेयते एवं च स्वरूपतो ज्ञानत्वादिविशिष्टबुद्धौ तथाविधतद्बुद्धेः सामग्र्या अपेक्षणीय
तेति मैवं तादृशकार्यकारणभावे कार्यतावच्छेदकं मतप्रकारतायां ज्ञानत्वादिवृत्तिनिरूपितविषयतायां भेदानिवेशात् इति न स्वरूप
तो ज्ञानत्वादिविशिष्टबुद्धौ तथाविधज्ञानापेक्षा उपदर्शितबहुतरलाघवेन च स्वल्पगौरवं न स्वप्रकाशतायां बाधकं इति अथ कामिनीजिज्ञा
साःकालीनकामिनीज्ञानस्य स्वप्रकाशता नोपपद्यते कामिनीजिज्ञासाकालीनघटादिज्ञानस्य वारणाय कामिनीभिन्नविषयकत्वं प्र
तो०६ ति कामिनीजिज्ञासायाः प्रतिबन्धकत्वं वधारणाद्वादिति चेन्न रूपविशिष्टकामिनीज्ञानं ज्ञापतामिते तादृशेच्छाकाले रूपवती कामिनीसा
दिबोधोपपन्नये साक्षात्परंपरया कामिनीविषयतानिरूपितविषयतानवच्छिन्नतदन्यकामिनीजिज्ञासायां प्रतिबध्यतावच्छेदकीभू
त कामिनीभिन्नविषयतायां निवेशनीयतया कामिनीजिज्ञासाकाले कामिनीविषयतानिरूपितज्ञानाविषयतावंशालिङ्गकेप्यनै
बाधकाभावात् विवेचनं चेदं मधिकमग्रे अथ समानविषयकानुमित्यादिसामग्रीकालीनपर्वतो वह्निमानित्याद्याकारकप्रत्यक्षता
दौ मितिमात्रादि ~~[illegible]~~ भानेन न संभवति वह्निमत्पर्वतादिभिन्नविषयकप्रत्यक्षत्वाद्यैतद्विषयकानुमित्यादिसामग्र्याः प्रतिबन्धकता
रनचेच्छानां विशिष्टज्ञानकत्वानुदोषेन घटत्वाद्युपलक्षितमात्रमेव प्रतिबध्यतावच्छेदकत्वमुपगन्तव्यं एवं च ज्ञानत्वादिमत्त्वे तत्र

नी २

तौ १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१८ तिवंधकताया अकल्पनात् ज्ञानात्मादिमानेबाधकाभावदिति वाच्यं इच्छाविशिष्टानुमितिसामग्र्याभिन्नविषयकप्रत्यक्षादिप्रतिवंधकतायामिष्टत्वे
जकत्वाभावात् तद्भिन्नविषयकानुमित्यन्यज्ञानत्वरूपानुगतधर्मस्यैवप्रतिबध्यतावच्छेदकतया इच्छाविशिष्टानुमितिसामग्रीकालीनेच्छाधीन
त्वस्मानविषयकप्रत्यक्षादौ तज्ज्ञानादिमानस्योपपादयितुमशक्यत्वात्। नचविरोधिसामग्रीकालीनेज्ञानेनात्मज्ञानत्वादिमत्त्वं स्वीक्रियते तद्दा
नीं घटीवं पहि त्याद्याकारकप्रत्यक्षादेरेव स्वीकारात् अनुमितिमात्रविषयकं सर्वज्ञानमपि स्वस्याविरोधात् इति वाच्यं स्वीयप्रत्यक्षान्तं तत्र
सिद्धेः गुरुमते आत्मत्वदीधितिकारेण इष्टत्वात् तस्यासंगतत्वापत्तेरिति सर्वत्रात्मत्वादिमानेतु तथात्मतत्त्वमितित्वतोनुपपत्तिरस्त्ये
वेति। नचानुमितिसमानविषयकप्रत्यक्षादिसामग्र्या इच्छादिविशिष्टायाः प्रतिवंधकतापातहभावस्याप्यनुमितिघटकतयेच्छाविशिष्टस्य द्सा:
मानविषयकप्रत्यक्षादिसामग्रीकालेऽनुमितिसामग्र्येवनास्ति कालीनसामग्रीतत्र ज्ञानादिमानिति वाच्यं। समानविषयकप्रत्यक्ष
सामग्र्या अनुमितिप्रतिवंधकत्वेपि अनुमितिसामग्रीप्रतिवंधकत्वे प्रयोजनविरहेण तद्धूनिवेशात्तानवृद्धेः तथापि विशेषपक्षवह्न्यनु
मितिसामग्र्या वह्निघटयोः प्रत्यक्षसामग्रीतत्र वह्निघटोभयप्रत्यक्षोत्पत्त्यापत्तेन्निवेशनमावश्यकं इति वाच्यं तत्र घटप्रत्यक्षान
भ्युपगमे इतिविरहात् अपि तु वह्निमत्पर्वतविषयताकप्रत्यक्षानत्वमेव पर्वतो वह्निमानिति सीतावृत्त्यनुमितिसामग्रीप्रतिबध्यताव
च्छेदकं नतु वह्निमत्पर्वतविषयताभिन्नविषयतावदनुमितिसम ~~ज्ञानत्वं तेरसामग्र्यं वह्निमत्पर्वतविषयताभिन्नविषयतावदनुमितिसम~~ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्याय: नं० ४३१२

कार्यकारणभावविचार:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥श्रीगणेशाय नमः॥ विशेषणतावच्छेदकप्रकारकनिर्णयजन्यकाले विशिष्टबोधापत्तिवारणाय विशिष्टवैशिष्ट्य-
बोधे विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुता कल्प्यते। सेयं हेतुता च न सामान्यतो विशिष्टवैशिष्ट्यबोधत्वावच्छि-
न्नं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन। सर्वसाधारणविशिष्टवैशिष्ट्यबोधत्वस्य विशेषणतावच्छेदक-
प्रकारकनिर्णयत्वस्य चैकस्याभावात्। एकविशेषणतावच्छेदकप्रकारकज्ञानादपरविशिष्टवैशिष्ट्यबोधापत्तेश्च।
किंतु रक्तत्वादिविशिष्टदंडादिवैशिष्ट्यावगाहित्वावच्छिन्नं प्रति दंडत्वावच्छिन्नविशेष्यताकरक्तत्वादिनिर्णयत्वे- क
न विशिष्टवैहेतुता। न च विशेष्ये विशेषणं तत्र च विशेषणांतरमिति रीत्या रक्तत्वविशिष्टयो दंडत्वनिरूपितसंयो-
गादिरूपवैशिष्ट्यावगाहितया तत्र व्यभिचारो निर्वाह्यो। रक्तत्वं दंडत्वोभयावच्छिन्नप्रकारताकत्वस्यैव तद्धर्मितावि-
शेष्ये विशेषणमिति रीत्या रक्तत्वादिविषयकज्ञानीयदंडादिप्रकारताया रक्तत्वावच्छिन्नतया तत्र व्यभि-
चाराभावात्। किंतु रक्तत्वविशिष्टदंडसंयोगपुरुषादिविशेष्यतानिरूपितप्रकारतायाः पर्याप्तिः विशिष्टवैशिष्ट्य-
बोधस्थले स्वीक्रियते। तथा च तादृशविशिष्टपर्याप्तप्रकारताकत्वमेव रक्तं दंडोऽइत्यादिनिर्णयजन्यतावच्छेदकमि- राम
त्यभ्युपेयते। विशेष्ये विशेषणमिति रीत्या रक्तत्वादिविषयकज्ञाने पुरुषादिविशेष्यतानिरूपितप्रकारतायाः १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शुद्धं दंड एव पर्यवसितं न यानं तत्र व्यभिचार इत्याहुः। तदसत्। तथा सति दंडांशे रक्तत्वभ्रमात्मकस्य रक्तदंडवानिति ज्ञा-
नस्य विशिष्टवैशिष्ट्यबोधत्वानुपपत्तेः रक्तत्वविशिष्टदंडाभावात्। एवं लोहितवह्निमान् इति ज्ञानस्य विशिष्टवैशिष्ट्य-
बोधत्वानुपपत्तेः लोहित्यविशिष्टवह्नेरप्रसिद्ध्या गतिरेवात्र विशिष्टा। अप्रसिद्धावपि खंडशः प्रसिद्धयोर्वह्निलोहित्य-
योरेव प्रकारतायाः पर्याप्तिः स्वीक्रियते कार्यतावच्छेदकमपि वह्निलोहित्योभयपर्याप्तप्रकारकत्वमेवेति
नानुपपत्तिरेवेति वाच्यं। पर्वतादिविशेष्यतानिरूपितप्रकारतायाः लोहित्यांशे स्वीकारे लोहित्याभाववान्पर्वत
इत्याकारकबाधबुद्धिदशायां लोहितवह्निमान्पर्वत इत्येतादृशविशिष्टवैशिष्ट्यबुद्ध्यनुत्पत्त्यापत्तेः। तन्म-
ते लोहितवह्निमानेतादृशविशिष्टवैशिष्ट्यबुद्धेरपि लोहित्यनिष्ठप्रकारतानिरूपितपर्वतविशेष्यता-
शालित्वेन तत्तादृशबाधबुद्धेर्विरोधित्वात्। तस्याश्च विशिष्टवैशिष्ट्यबोधस्थले विशेषणतावच्छेदकवि-
शेषणयोर्नैकप्रकारतापर्याप्तिः किंतु विशेषणतानिष्ठप्रकारता विशेषणतावच्छेदकावच्छिन्नैवेति। वि-
शेष्ये विशेषणमित्यत्र तु विशेषणतावच्छेदकप्रकारतानिरूपितैव विशेषणप्रकारता न तु विशेषण-
तावच्छेदकावच्छिन्नेति तयोर्भेदः। अथ रक्तत्वं दंडत्वोभयधर्मावच्छिन्नप्रकारताकत्वस्य दंडो रक्त इति नि-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णयिजन्यतावच्छेदकत्वेपि रक्तत्वधर्मितावच्छेदककदंडत्वप्रकारकनिर्णयिजन्यरक्तदंडवानितिविशिष्टवैशिष्ट्यबोधे व्यभिचारोद्धु
रः । तत्रापि दंडनिष्ठप्रकारतायाः दंडत्वरक्तत्वोभयावच्छिन्नत्वात् । न चा रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यताशालि
त्वस्य तादृशनिर्णयिजन्यतावच्छेदके प्रवेशान्न व्यभिचार इति वाच्यं । तादृशबोधे नैवपत्त्रा विशेष्ये विशेषणमिति न्यायेन दंड
त्वावच्छिन्ने रक्तत्वविषयीकृतं तत्र तादृशसमूहालंबने व्यभिचारस्य तादवस्थ्यापि दुर्वारत्वादिति चेन्न । रक्तदंडवानित्येतादृश
ज्ञानीयोभयधर्मावच्छिन्नदंडप्रकारताया एव रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यतास्वरूपत्वाभ्युपगमात् । रक्तत्व
प्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यताभिन्नरक्तत्वावच्छिन्नप्रकारताया एव दंडो रक्त इत्येतादृशनिर्णयिजन्यतावच्छेदक
त्वाभ्युपगमेन तत्र व्यभिचारानवकाशात् । तादृशसमूहालंबनबोधीयोभयधर्मावच्छिन्नविषयता दंडत्वप्रकारतानिरूपित
रक्तत्वावच्छिन्नविशेष्यतारूपाया रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यताभिन्नत्वात् । न च रक्तत्वावच्छिन्नप्रकारताया
रक्तत्वप्रकारतानिरूपितविशेष्यतारूपत्वेन रक्तदंडवानिति बोधस्य रक्तत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वप्रकारताशा
लित्वप्रसंगः । तथा च तादृशज्ञानाद्रक्तत्वावच्छिन्नविशेष्यकरक्तत्वप्रकारकरक्तो रक्त इत्याकारकस्मरणापत्तिः । तत्र तथाविध
निर्णयिस्य हेतुत्वादिति वाच्यं । रक्तत्वावच्छिन्नविशेष्यतायास्तत्र रक्तत्वप्रकारतानिरूपितत्वेपि रक्तत्वावच्छिन्नविशेष्यतात्वेन राम
तस्यास्तादृशप्रकारतानिरूपितत्वात् । उपगमात्तेन रूपेण रक्तत्वप्रकारतानिरूपितविशेष्यताशालिज्ञानस्यैव रक्तो रक्त इ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ तत्त्वा॰ त्याकारस्य तज्जनकतत्ताद‍ृशस्मरणाप्रत्यसंभवात्। एकसंबंधेनरक्तत्वप्रकारकनिर्णयस्य तत्संबंधांतरेण रक्तत्वविशिष्टवै
शिष्ट्यावगाहिज्ञानकारणाय विशेषणतावच्छेदकीभूतसंबंधविषयतानिवेशएतद्भेदेनविभिन्नकारणभेदकल्पना। एवं रक्त
दंडवत्पुरुषवाननयइत्याकारकविशिष्टवैशिष्ट्यबोधेरक्तदंडवान्पुरुषइत्यादिनिर्णयत्वेनहेतुता। तत्रचदंडांशे रक्तांश
निर्णयत्वंनिवेश्यं। एवंश्यामदंडोदंडवानित्याकारकविशेषणतावच्छेदकांशेनिर्धर्मितावच्छेदकेदंडत्वादिविशिष्टवै क
शिष्ट्यबोधंप्रतिनिर्णयत्वमनिवेश्यदंडत्वप्रकारकज्ञानत्वेनैवहेतुता। निर्धर्मितावच्छेदकसंशयाभावेनतत्रनिर्णयत्व
[illegible] निवेशप्रयोजनविरहात्। तेन तुता दु॰अ
च दंडत्वादिनिर्विकल्पकदशायांतादृशविशिष्टवैशिष्ट्यबोधवारणाय। एवं दंडो रक्तोनवेतिसंशयानंतरं रक्तविशेषणविशि
२ ष्टपरमिश्रेषणस्येवैशिष्ट्यमिति रीत्या रक्तदंडः प्रमेय इत्यादिबोधवारणाय तादृशविशिष्टवैशिष्ट्यबोधे विशेष्यताव
च्छेदकप्रकारकनिर्णयस्य हेतुतांगीकाये तद्धेतुताभेदंडत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वप्रकारताशालिनिर्ण
यत्वेनतन्यतावच्छेदकंचरक्तत्वविशिष्टदंडत्वावच्छिन्नविशेष्यताशालिज्ञानत्वं तेनप्रमेयत्वादिकमवगाहमानस्येकत्वक्षय।
मितिरीत्या तथाविधज्ञानस्यदंडनिष्ठविशेष्यतानरक्तत्वावच्छिन्नेतिनतत्रव्यभिचारः नचप्रमेयत्वप्रकारतानिरूपितदंड
निष्ठविशेष्यतायां रक्तत्वाद्यनवच्छिन्नत्वेन रक्तत्वंधर्मितावच्छेदकीकृत्यप्रमेयत्वादिबोधकालेतथाविधज्ञानापत्तिरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तादृशविशेष्यतायां रक्तत्वावच्छिन्नत्वमावश्यकमिति वाच्यं। एवमपि प्रमेयत्वादिप्रकारतानिरूपितदंडत्वाद्यवच्छिन्नविशेष्य
ताभिन्नया एव रक्तत्वावच्छिन्नविशेष्यतायाश्चानुपगमात्। एकस्या विशेष्यताया रक्तत्वदंडत्वोभयावच्छिन्नत्वे न व्यभिचारा
[illegible] नवकाशा
त्। तन्मात्रपि रक्तत्वधर्मितावच्छेदककदंडत्वप्रकारकनिर्णयजन्ये दंडो रक्तः प्रमेय इति एतादृशबोधे व्यभिचारवारणाय तादृश
विशेष्यतायां रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यत्वाशालित्वं निवेशनीयं। इदंत्वविधेयं। रक्तदंडवान रक्तदंडः प्र
मेय इत्याकारकोभयविशिष्टवैशिष्ट्यमाधारं रक्तत्वविशिष्टदंडत्वावच्छिन्नविषयताशालिज्ञानत्वावच्छिन्नं प्रति दंडो रक्त
इत्येतादृशनिर्णयत्वादिनैव हेतुत्वं कल्प्यते। कदाचित्तादृशविशिष्टधर्मावच्छिन्नप्रकारताशालिज्ञानं कदाचित्तादृशविशे
ष्यताशालिज्ञानं रक्तं त्वया। अविनिगमकत्वेन षष्ठ्या चोभयत्वादिनामपीति। अथ रक्तो दंडो नवेत्याकारकसंशयानंत
रं रक्तदंडं मद्देमीत्याकारकरक्तत्वविशिष्टवैशिष्ट्यावगाह्यनुव्यवसायोदयात्तद्विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छे
दकप्रकारकनिर्णयत्वेन हेतुत्वकल्पनं न संभवति। न च तत्र विशेष्ये विशेषणमिति रीत्यैवानुव्यवसायो भवतीति तत्र
सो विशिष्टवैशिष्ट्यविषयताशालीति वाच्यं। विशिष्टवैशिष्ट्यविषयताशून्यज्ञानानुव्यवसायास्यु
पगमे रक्तः पटो दंडो द्रव्यमित्यादिव्यवसायानंतरमपि विशेष्ये विशेषणमिति रीत्या रक्तदंडं जानामीत्याकारकानुव्यव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सायापत्तिरितिचेन्नतानां दंडो रक्तो न वेत्यादिसंशयानुव्यवसायो न ज्ञानांशे रक्तत्वविशिष्टदंडप्रकारकः किंतु प्रकारितासंबं
धेन ज्ञानांशे रक्तत्वप्रकारकः । को दंडो रक्तत्वसंदेहीत्याकारक एव यदि तत्र ज्ञानांशे रक्तत्वविशिष्टदंडप्रकारकत्वं दंडे रक्तत्व
प्रकारकोऽप्यनुव्यवसायः स्यात् तदा स्वीक्रियतेतरां यतो विशेष्ये विशेषणमितिरीत्यैव ज्ञायते न तु विशिष्टवैशिष्ट्यविषयताशाली ।
न च पूर्वोक्तातिप्रसंगः । रक्तत्वविशिष्टदंडप्रकारतानिरूपितविषयितासांसर्गिकविषयतानिरूपितविशेष्यतासंबंधेनानुव्य
वसायं प्रति रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यताकत्वेन हेतुताया आवश्यकत्वात् । पूर्वोक्तसमूहालंबनानं
तरं च तथाविधानुव्यवसायासंभवात् । आवश्यकत्वं च तादृशहेतुतायाः । रक्तदंड इत्याद्यौ कारकप्रत्यक्षानंतरं यत्र तादृश
समूहालंबनस्मरणादिकं तत्र रक्तदंडं स्मरामीत्यनुव्यवसायापत्तिवारणायेति । अथ दंडो रक्त इत्येतादृशज्ञानोपरमेपि
द्वा रक्तदंडं करोमीत्याकारकस्मृतिसोत्कारोत्पत्त्यात्तत्र व्यभिचारः । न च ज्ञानत्वमपि वेश्यदंडत्वावच्छिन्नविशेष्यताकरक्तत्वप्र
कारकत्वेनैव हेतुत्वाम व्यभिचार इति वाच्यं । तथापि दंडो रक्त इत्याकारकानुभवसंस्कारसत्त्वोक्तानिर्विकल्पकदशाप
न्नपि विशिष्टवैशिष्ट्य [illegible] बोधापत्तेः । न च संस्कारजन्यविशिष्टवैशिष्ट्यबोधे उद्बोधकानां हेतुत्वेन तदभावान्नापत्तिरिति
वाच्यं । उद्बोधकं विनापि सामान्यसामग्र्याः फलजननेन विशिष्टवैशिष्ट्यबोधसामान्यापादने उद्बोधकविरहस्याकिंचित्करत्वा
दिति चेत् । न स्मृतिसाक्षात्कारसूर्वं नियमतो दंडो रक्त इत्याकारकस्मरणाभ्युपगमेन व्यभिचारानवकाशात् । वस्तुतस्तत्संस्का

प्रत्यक्षत्वेऽपि इच्छाकृतिसाधारणतद्विषयकविजातीयगुणत्वेनैव हेतुत्वोपगमात्। आवश्यकत्वं च गुणे ॥३

स्याच्चत्वं ज्ञानेच्छाकृतिवृत्तिजातिविशेषकल्पनया विशेषणतावच्छेदकप्रकारकविजातीयगुणत्वेनैव हेतुत्वं स्वीक्रियते। अतंतस्मृ
तिहेतुत्वशक्तिकल्पनापेक्षया तादृशजातिकल्पनाया एवोचितत्वात्। न च कृतिसाक्षात्कारपूर्वं विषयस्मृतिकल्पनमावश्यकं।
अन्यथोपनायकज्ञानविरहेण विषयभानासंभवेन कृतिसाक्षात्कारानुदयप्रसंगादिति वाच्यं ज्ञानलक्षणामानसजनकतावच्
२ छेदकतया संस्कारादिवृत्तिजातिविशेषकल्पने। अन्यथा संस्कारादीनां मानसापत्तेरिति। विशिष्टवैशिष्ट्यानुभवत्वमेव ज
न्यतावच्छेदकत्वमास्थीयते स्मरणे तादृशसंस्कारस्य तादृशविषयताविधामक इति वहकः केचित्। अनुभवत्वजातेर्मा
नाभावेन ज्ञानत्वस्यापि नित्यसाधारणतया तस्य जन्यतानवच्छेदकत्वात्। जन्यप्रत्यक्षवृत्ति जातिविशेष एव विशेष
णतावच्छेदकप्रकारकनिर्णयजन्यतावच्छेदकः। अनुमित्यादौ परामर्शादिरेव तादृशविषयतानियामकः। एवं च शाब्दबो
धे अन्वयांतरवाक्यार्थबोध एव तथा। अथ विजातीयप्रत्यक्षत्वस्य तज्जन्यतावच्छेदकत्वे इतरव्यापकीभूताभावप्रतियोगि
त्व। घटीत्ववान्ती पृथिवीत्याकारककपरामर्शादिनभेदत्वप्रकारकतानदशायामिव तत्कृसदशायामपि पृथिवीतरभे
दवतीत्याद्याकारकविशिष्टवैशिष्ट्यविषयताशालिन्या अनुमितेरापत्तिः। तादृशानुमितौ वत्वव्याप्तितानस्यैव हेतुत्वा
त्वापत्तिरित्युक्तौ च स्वातंत्र्येणेतरभेदत्वप्रकारकज्ञानस्य सत्वे तादृशानुमित्यनुदयापत्तिः। न च पृथिवीमितरभेद इत्याकारि राम
कानुमितिरेवोत्पद्यत इति वाच्यं। साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेर्विधितपातत्र तादृशानुमित्युत्पादासंभवात्तान ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च विशेष्ये विशेषणमिति रीत्या पृथिवीतरभेदवतीत्याकारिकानुमितिस्तत्र जायत एवेति वाच्यं। तथा सति साध्यज्ञानशून्यका
लेतादृशपरामर्शात् पृथिव्यामितरभेदः पृथिवीतरभेदवतीत्याकारिकद्विविधविषयताशालिन्या अनुमितेरापत्तेः। न च
विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वान्नापत्तिरिति वाच्यं। एवमपि प्रमेयत्वादिनाऽऽइतरभेदज्ञानकाले तथाविधानु
मितेरापत्तिसंभवात्। न च प्रमेयत्वादिना साध्यज्ञानकाले साध्यविशेष्यकानुमितिं प्रति बाधकीभूतसाध्यसिद्धिसत्त्वेन त
न द्विविधविषयताशाल्यनुमित्यापत्तिरिति वाच्यं। साध्यतावच्छेदकप्रकारकसिद्धेरेव साध्यविशेष्यकानुमितिविरोधित्वा
त्। अन्यथा इतरभेदत्वरूपेणाभेदांते रावगाहिपृथिव्यां इतरभेदइत्याकारकसिद्धिकाले तादृशानुमितिवारणापत्तादृशा
नुमितिं प्रति पक्षविषयत्वनिविष्टसिद्धेः प्रतिबध्यप्रतिबंधकत्वानंतरापत्तेरिति। तस्मादितरभेदत्वप्रकारकज्ञानकालीन
व्यतिरेकव्याप्तिज्ञानजन्यानुमितौ विशिष्टवैशिष्ट्यविषयताया स्वीकार आवश्यकः। तत्साधारण्यं च विशेषणतावच्छेदकप्र
कारकज्ञानजन्यतावच्छेदकस्यावश्यकं। तथा च सति नेतरभेदत्वप्रकारकज्ञानशून्यकाले विशेष्ये विशेषणमिति रीत्या
इतरभेदत्वप्रकारकद्विविधविषयताशाल्यनुमित्यापत्तिः। विशिष्टवैशिष्ट्यानवगाहित्वाद्विशेष्ये विशेषणमिति रीत्या
जायमानाया अनुमितेरप्रसिद्धेः। विशिष्टवैशिष्ट्यावगाहिन्यां च तस्यां विशेषणतावच्छेदकप्रकारकनिर्णयस्य हेतुत्वादि
ति चेत एवमपि अनुमितौ स्वातंत्र्योणोवहेतुत्वं अनुमितिसाधारणस्य जन्यतावच्छेदकत्वे नित्यव्यावर्त्तनीयाय जन्यत्वनिवेशश्च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

स्यावश्यकतयामिथो विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावद्वयस्यावश्यकत्वात्। अवच्छेदके गौरवाच्च। पा
कुः परे तु अनुभवत्वादिकमनिवेश्य विशिष्टवैशिष्ट्यविषयतावत्त्वमेव तदवच्छेदकमास्थीयते। विशेषणतावच्छेदकप्रकार
कज्ञानशून्यकालीनस्मरणोद्बुद्धज्ञाने च विशिष्टविशेषणमित्येतादृशविषयतामात्रमनुपेयते। तेन न व्यभिचारः। न वानि
त्यसाधारणमिति निवर्दनी। केचित्तु। विशेषणतावच्छेदकसंशयकाले विशिष्टवैशिष्ट्यबोधं स्वीकृत्य निर्णयत्वमनिवेश्य वि
शेषणतावच्छेदकप्रकारकज्ञानत्वेनैव हेतुतां कल्पयन्ति। तदसत्। संशयसाधारणज्ञानस्य हेतुत्वे। अप्रामाण्यनिर्णयस्यैवोत्तेज
कतया निर्णयत्वेन हेतुत्वे चाप्रामाण्यज्ञानसामान्यस्यैव तथात्वे न निर्णयत्वेन हेतुत्वकल्पनस्योचितत्वात्। अन्यथा विशे
षणतावच्छेदकप्रकारकनिर्णयत्वापेक्षया गुरुशरीरस्याप्रामाण्यज्ञाननिर्णयत्वनिवेशनमहागौरवप्रसंगात्। अथ वि
म शेषणतावच्छेदकसंशयकल्पितं च अप्रामाण्यशंकायां भवन्मते इष्टमपि विशिष्टवैशिष्ट्यबोधानंगीकारादप्रामाण्यज्ञानवा
वच्छिन्नाभावे विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां निवेश्यते न तु निर्णयत्वघटितगुरुशरीरावच्छिन्नाभाव इति चे
त्। एवमपि संशयसाधारणज्ञानस्य विशिष्टवैशिष्ट्यबोधहेतुत्वे। तु मित्यादिकं प्रति परामर्शस्य हेतुत्वे वह्निव्याप्यधूमवान्
पर्वतः वह्निव्याप्यधूमवत्त्वस्य हानसमित्याद्यनिकविधज्ञाने व्याप्यांशे निर्णयत्वनिवेशापत्ते रवं। अस्माकं तु तत्र व्याप्तिविशि ताम
ष्टवैशिष्ट्यावगाहिज्ञानत्वादिना हेतुत्वस्वीकारात्। विशेषणतावच्छेदकांशे संशयात्मकविशिष्टवैशिष्ट्यबोधाप्रसिद्ध्या व्याप्त्यं ५

गा १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यत्वस्यानिवेशेपि स्वतन्तिविरहात् तन्त्वाहार्यविशेषणतावच्छेदकप्रकारकनिर्णयो नरो त्यन्न स्वविशेषणतावच्छेदकांशे सं
शयात्मकज्ञानस्य विशिष्टवैशिष्ट्यविषयताशालित्वबाधकाभावात् तादृशज्ञानोत्तरमनुमितिवारणाय विशेषणता
वच्छेदकप्रकारकनिर्णयित्वे न विशिष्टवैशिष्ट्यबोधवादिनापि परामर्शहेतुतायां व्याप्यांशे निर्णयित्वमवश्यं निवेश्य मि
ति लाघवमिति वाच्यं। अनाहार्यविशेषणतावच्छेदकप्रकारकनिर्णयित्वेनैव विशिष्टवैशिष्ट्यबोधे हेतुत्वाभ्युपगमा
१ वैशिष्ट्यबोधहेतुतायां। त्। अत एव विशिष्टवैशिष्ट्यबोधे पि तु मितिलक्षणानि व्यास्तिःसंगच्छते। अन्यथानुमितिजनकतावच्छेदकको
टावनाहार्यत्वनिवेशे विशिष्टनिवेशे एकरूपेण हेतुत्वाभावान्नानिव्याप्तिविशिष्टकायामनुगत्यापत्तेः। नच विशेषणता
वच्छेदकप्रकारकज्ञानहेतुतायां [illegible] अनाहार्यत्वस्य निर्णयित्वस्य च निवेशापेक्षया परामर्शहेतुतायां
व्याप्यांशे निर्णयित्वनिवेशनमेवोचितमिति वाच्यं। वह्निव्याप्यधूमवान् पर्वतः वह्निव्याप्यधूमवन्महानसमित्यादिनेकवि
धज्ञाने हेतुतायां निर्णयित्वनिवेशापेक्षया धूमो वह्निव्याप्य इत्याकारकैकविधज्ञानहेतुतायां तन्निवेशे लाघवात्। न
च धूमो वह्निव्याप्य इत्याकारकसामानाधिकरण्यावगाहियो निर्णयिदशायां सामानाधिकरण्येन व्याप्यभाववानेवा
धकाभावात् धूमत्वसामानाधिकरण्येन व्याप्यभावकोटिके संशयस्यापि विशिष्टवैशिष्ट्यविषयताशालित्वात्तदुत्त
रमनुमितिवारणाय व्याप्यांशे निर्णयित्वनिवेशनमावश्यकमिति वाच्यं। विशेष्यतावच्छेदकसामानाधिकरण्येनोभ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थकोऽघवगाहि ज्ञाने संशयत्वाभावात्तादृशज्ञानादनुमितिस्वीकारे सत्यभावत्वानवच्छिन्नत्वसामानाधिकरण्येन व्याप्तिप्रका
रकनिर्णयानंतरोत्पन्नात्तत्त्वावच्छेदेन व्याप्यवगाहिनो धूमत्वसामानाधिकरण्येन व्याप्यभावावगाहिनः संशयादनु
त्या चाक्षुषत्वावच्छिन्नं प्रत्यवच्छेदकतया प्रत्यासत्त्यैव चक्षुर्मनोयोगादीनां हेतुत्वं कल्प्यते। उपदर्शितस्य
लेपटचाक्षुषानुरोधेन पटरूपविषयावच्छेदेनैव चक्षुर्मनोयोगः कल्पनेन तु घटावच्छेदेनापीति नाति
प्रसंग इति तदसत्‌॥ तथा सति विषयेंद्रियसन्निकर्षहेतुताया विलयप्रसंगादिति। विषयेंद्रियसन्निकर्ष
स्तूत्सकाले तत्तद्विषयावच्छेदेनेंद्रियमनोयोगाकल्पनादेवातिप्रसंगवारणसंभवादिति। इदं त्वापाततः।
वस्तुतस्तु विशेष कार्य कार्यकारणभावकल्पनेऽपि सामान्यकार्यकारणभाव आवश्यकः अन्यथाऽसंनि
कृष्टघटादौ द्रव्यप्रत्यक्षानुत्पत्तिप्रयोजकतातत्तद्विशेषधर्मावच्छिन्नाभावेऽपि स्वीकर्त्तव्येति गौरवं मन्मते
तु एकस्मिन्नेव विजातीयसंयोगत्वावच्छिन्नाभाव एव कल्प्यत इति लाघवं तस्माद्द्रव्यलौकिकचाक्षुष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्निक

वक्तव्या। अथवा चक्षुरादिसंयोगेष्वेव जातिविशेषः कारणतावच्छेदकतयास्वीक्रियते॥ तदभ्युपगमश्चा
वश्यकः॥ अन्यथा ऽऽत्मदेशावच्छिन्नेंद्रियसन्निकर्षादितो द्रव्यप्रत्यक्षादिप्रसंगात् इति चेत् संभवत्येतादृशा
रीत्यानुगतरूपेण कार्यकारणभावः किंत्वप्रामाणिकः कदाचिच्चाक्षुषं कदाचित्स्पार्शनं इत्यादिनियम(
निर्वाहाय चाक्षुषादौ चक्षुःसंयोगादीनां विशेषकारणताया आवश्यकत्वादेतादृशकार्यकारणभावं विना
ऽप्युपपत्तेः॥ अथ विषयेंद्रियसन्निकर्षस्योक्तानुगतरूपेणैव हेतुता कल्प्यते इंद्रियमनोयोगस्य च च ९
क्षुर्मनोयोगत्वादिना चाक्षुषत्वाद्यवच्छिन्नं प्रति विशिष्यैव हेतुत्वेति न चाक्षुषस्पार्शनादावतियमः। चक्षु
र्मनोयोगादिश्च फलबलाच्चाक्षुषाद्यव्यवहितपूर्वक्षण एव कल्प्यते अतो विषयसत्वगिंद्रियमात्रसंयोग
दशायां चक्षुषा च समं मनःसंयोगसत्त्वे चाक्षुषापत्तिरित्येतादृशफक्किकानवतार इति चेन्न विषयेंद्रिय
सन्निकर्षस्य विशिष्य हेतुत्वानभ्युपगमे यत्र घटे त्वगिंद्रियमात्रसन्निकर्षं पटे च चक्षुःसन्निकर्षस्तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्निकर्षः — लि० गदाधरः। नं० ४२०८

श्रीगणेशाय नमः॥ ॥श्रीसिद्धेश्वर्यै नमः॥ ॥प्रत्यक्षानुमित्युपमितिशाब्दभेदेन प्रमा चतुर्विधा॥ तत्र
ऐंद्रियसंनिकर्षजन्यं ज्ञानं प्रत्यक्षं। जन्यताचविषयताप्रत्यासत्यवच्छिन्ना ग्राह्या। तेन जन्यज्ञानमात्रस्यैवात्मम
नोयोगजन्यत्वेपि नातिप्रसंगः। जन्यज्ञानत्वावच्छिन्नाया आत्ममनोयोगजन्यतायाः समवायप्रत्यासत्यव
च्छिन्नत्वात्॥ तत्र लौकिकसन्निकर्षः षड्विधः संयोग। संयुक्तसमवाय। संयुक्तसमवेतसमवाय समवाय
समवेतसमवायविशेषणताभेदात्। अलौकिकस्त्रिविधः सामान्यलक्षणाज्ञानलक्षणायोगजधर्मभेदात्।
एतेषां च प्रत्यक्षसामान्यं प्रति अनुगतरूपेण हेतुता संभवति। सर्वसाधारणानुगतातिप्रसक्तरूपस्य दु
र्लक्षणोपि दुर्वचत्वात्। नापि द्रव्यादिविषयकलौकिकप्रत्यक्षं प्रति चक्षुस्त्वग्मनोयोगादिसाधारणेंद्रियसं
योगत्वादिना चक्षुरादिसाधारणेंद्रियादित्वस्यानुगतस्य निर्वक्तुमशक्यत्वात्। न चेंद्रियत्वं जातिः। तेजस्त्वादि
नां संकरप्रसंगात्। अर्थेंद्रियनिष्ठेष्वेकेषु जातिविशेषं स्वीकृत्य विजातीयेकत्ववत्संयोगत्वादिनैव हेतुता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाच्यं। तस्याप्याघात्। तस्मादेतद्दृष्टावच्छिन्नं प्रतितद्दंडत्वेन हेतुतेति विशिष्टैककार्य्यकारणभावः। प्रत्यासत्तिस्तु न संयोगः। तद्दंडानधिकरणादे-
शेपि तत्सत्वात्। किंतु यद्देशवृत्तिसंबंधेन घटः तद्देशवृत्तित्वं स्ववृत्तित्वसंबंधेन दंडघटितकालिको देशिकी वा। यत्र तादात्म्यसंबंधेन घटः तत्र स्वप
तासंबंधेन दंडरूपेण तादृशविशेषस्वीकारे मामेयमनाभावशनिवदिति। प्राचीनास्तु। भ्रमिजनकत्वेनैव दंडस्य हेतुतेति। न च। भ्रम्यं प्रतिपूर्ववर्त्ति
त्वेः स्यान्यथासिद्धत्वात्। घटार्थिनो दंडे प्रवृत्तिश्च प्रथमं भ्रमेरुपधानानिर्णयात् विनिगमकाभावात्। दंडस्यापि घटजनकत्वेन भ्रमिं प्रति
हेतुत्वे अन्योन्याश्रयात्। केचित्तु दंडत्वं कृत्तिजातिस्वीकारे परंपरासंबंधेन हेतुत्वकल्पनागौरवात् दंडवृत्तिरेव जातिर्न संकरः स्वर्णादेः पा-
र्थिवभागस्याप्युपष्टंभकत्वात्। न वृत्तिरेव जातिरित्याहुः। दंडत्वं तद्वृत्तिधीविशेष्यत्वमिति केचित्। न दंडवृत्तिशक्तिस्वीकारादेकशक्ति
सत्वेन तस्य हेतुतेति। यथा तृणादावपि मणिवृत्तिशक्त्यैव वह्नेदर्शकं कारणतानामवादिमाग्यितथा कार्य्यतावच्छेदकं खंडघटत्वाद्यवृत्तिनाति राम: ३
विशेषः। तेन न व्यभिचार इति केचित्। कचित्तु दंडत्वं दंडमात्रवृत्तिमखंडोपाधिः सतनावच्छेदकमित्याहुः। । इति दंडघटकारणतावि-
चारः। । दण्डकारणता विचारः। गदाधरः। नं० ४३०७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गमनाविरहात्। अत्र केचिदाहुः। न च सा जाती रूपादिवृत्तिर्नीलत्वादिना जातिसंकरप्रसंगात्। न च रसवृत्तिर्मधुरत्वादिना जातिसंकरप्रसंगात्।
न च गंधवृत्तिः सुरभित्वादिना संकरप्रसंगात्। न च स्पर्शवृत्तिः सुकुमारत्वादिना संकरप्रसंगात्। न च परिमाणवृत्तिः प्रकृष्टत्वादिना सं-
करप्रसंगात्। न च संयोगवृत्तिरभिघातत्वादिना संकरप्रसंगात्। न चाभिघातत्वं विरुद्धमेवास्तु तथापि दंडत्वस्य एकदंडस्य चक्रसंयो-
गादिरूपकल्पनापेक्षया लाघवात् नैकत्ववृत्तित्वमेवास्तु पृथक्त्ववृत्तिरस्तु हेत्वबधिज्ञानापेक्षणात्। तादृशजातिप्रत्यक्षं प्रति अव-
धिज्ञानस्य स्वातंत्र्येण हेतुकल्पने गौरवात्। न च तत्कार्यतावच्छेदकं पृथक्त्वप्रत्यक्षत्वं मेयत्वादिना पृथक्त्वाभाने व्यभिचारवृत्तिश्च पृथक्-
त्वस्यैकपृथक्त्वद्विपृथक्त्वादिबहुप्रकारसंभवात्। तावद्भेदेन कार्यकारणभावकल्पनेनतानंत्यं तदपेक्षया पृथक्त्वभिन्नासमवेतप्र-
कारकप्रत्यक्षं प्रति अवधिज्ञानस्य हेतुत्वमस्तु लाघवात्। न च दंडत्वस्यापि पृथक्त्वभिन्नावृत्तित्वात्। न च ग्रहे अवच्छिन्नत्वनस्यन स्यात् त-
मिति. तंत्र्येण हेतुत्वं॥ विषयसंदिग्धत्वात्। मणिकारमतेनैतदनभ्युपगमात्। दंडत्वावच्छेदेन कारणताग्रहे तत्पूर्वं तादृशजाति -- नैकत्व-
वृत्तिमेवास्तु जातिः। न च एकवृत्ति दंडत्वजातिस्वीकारे कोमलदंडादपि घटोत्पत्तिः स्यात्। न च भ्रमेर जनकत्वादेव न घटोत्पत्तिरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य कृतित्व घटादेरपि क्षणिकत्वापत्तेः अवयविनाशं प्रति द्रव्यनाशं प्रति वा अवयवसंयोगनाशस्यारंभकसंयोगनाशत्वेन विजाती
यसंयोगनाशत्वेन वा हेतुत्वं किंतु द्रव्यनाशं प्रति स्वाश्रयसमवेतसंयोगनाशत्वेन तत्तद्व्यक्तित्वेन वा तथा च अखंडघटप्रयोगत
तत्र द्व्यवयवनाशेपि घटनाशे विनाशानुपपत्तिः बाधितत्वाच्च तत्र घटेन घट इति प्रतीतेरभावात् घटो भग्न इति प्रत्ययस्यावयवसं
योगनाशविषयत्वात् । इति चेन्न । उभयसिद्धसकर्तृकव्यक्तिनिष्ठतत्तद्व्यक्तित्वादीनां कर्त्रादिकार्यतावच्छेदकत्वापेक्षया ला
घवाज्जन्यत्वमतिरिक्तं स्वीकृत्य तस्यैव कर्त्रादिकार्यतावच्छेदकत्वं स्वीक्रियते । न चैतादृशकार्यकारणभावस्वीकारे क्षितिकर्तृ
त्वेन ईश्वरस्य तत्र ज्ञाने कृतीनां च न तत्र मूर्त्तसंयोगादीनां च कल्पनागौरवमिति वाच्यं । एतादृशकल्पनागौरवस्य फलमुखत्वेना रामः
इतीश्वरवादः दोषत्वात् इति संक्षेपः ॥ ॥श्रीः॥ ननु दंडस्य घटत्वावच्छिन्नं प्रति केन रूपेण हेतुता नानतावद् दंडत्वेन तस्यैकस्याभावात् । न च दं १६
डत्वजातिर्घटजनकतावच्छेदक एवेति वाच्यं । पृथिवीत्वादिना संकरप्रसंगात् । तथाहि पृथिवीत्वं विहाय दंडत्वं स्वर्णदंडे दंडत्वं वि
हाय पृथिवीत्वं घटे पार्थिवदंडे तयोः सांकर्यात् । न च दंडकत्वव्याप्ति जातिविशेषः । परंपरया दंडत्वानीति ... पादिवृत्ति न याविभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मीमांसकानां शरीरत्वेन हेतुत्वं क्षित्यादौ व्यभिचारस्य च क्षायितत्वात् । कृतिजन्यतात्वमेव शरीरजन्यतावच्छेदकमिति चेन्न कृतिजन्यताव
च्छेदकं यदि जन्यत्वं क्षित्यादौ व्यभिचारः कृतिजन्येन शरीरजन्यत्वमिति प्रसक्तत्वान्न विहितं न वत्वात् । ईश्वरासिद्धेरप्रसङ्गत्वाच्च । अ
थ घटादिकं कृतिजन्यतावच्छेदकं न हि तदेव शरीरजन्यतावच्छेदकमस्तु किं कृतिजन्यत्वेन अथ जन्यत्वं प्रागभावप्रतियोगित्वं न द
नङ्गीकारे ध्वंसप्रतियोगित्वं वा प्रागभाववत्त्वादिकं चाखण्डोपाधिरिति सिद्धान्तविरुद्धं । अभावत्वप्रागभावत्वादेः स्वरूपानतिरिक्तत्वसिद्धान्ता
त् । तादात्म्येन वाधाधेयभावेन वा स्वाश्रयत्वे वस्वस्य सत्त्वात् । इत्थं च प्रागभावप्रतियोगित्वस्य तत्तद्व्यक्तिविश्रान्ततया । न व्यक्तित्वमे
व कर्तृतानादेश्वकार्यतावच्छेदकं न कथंचिदिति कर्तृकत्वसिद्धिरुभयसिद्धसकर्तृकपक्षे स्वतन्त्रव्यक्तित्वेन कर्तृजन्यत्वात् कृतिजन्यत्वा
च्च लाघवात् । सिद्धान्ते सन्तानत्वस्य खण्डत्वं प्रागभावत्वादेर्जन्यत्वस्य वा स्वीकारे च उभयसिद्धसकर्तृकव्यक्तिनिष्ठतया स्वीका
रे तेनैव ज्ञानादिजन्यतायां लाघवात् । अतिरिक्तस्य ईश्वरस्य तत्र ज्ञानेच्छाकृतीनां तेनामूर्त्तसंयोगादौ नवि फलत्वनागौरवात् । ए
वं खण्डघटादौ व्यभिचारादघटत्वावच्छिन्नं प्रति यत्नं दण्डत्वादिना हेतुत्वं तथा ज्ञानेच्छाकृतित्वादिनापि वस्तुतस्तु घटकमात्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जनकतावच्छेदिका अवयविमात्रवृत्तिजातिः सा च चैत्रत्वमैत्रत्वादि इति वर्द्धमानोपाध्यायाः अन्यत्र चेष्टाशक्ति प्रतीतेः योगात्। इति
चैनस्समवायेन कार्यतावच्छिन्नं प्रति तादात्म्येन कार्यत्वावच्छिन्नं प्रत्येव वा विषयतया ज्ञानेच्छाकृतीनां हेतुत्वमित्युक्तलक्ष
वलेन हेतोः साध्यव्याप्यत्वसिद्धौ साध्यव्याप्यहेतोरव्यापकत्वेन नानुपाधिः साध्याव्यापकत्वात्। शरीरजन्यत्वस्य क्षित्यादिपक्षे सत्प्रतिपक्ष
त्वसंभवेपि अस्मदादयः कर्तृत्वात् शरीरपवनसंयोगादीनां चेश्वरजन्यानां सत्त्वात्। स्वधर्माधर्मसाक्षात्कारणां कार्यत्वेन ईश्वरसिद्धौ
बाधकाभावात्। शरीरजन्यत्वेन सप्रतिपक्षासंभवात्। सकर्तृकत्वानुमानसंभवात् इति तु वैशेषिकाधिकारव्याख्याने न्यायाः। तस्मिं सं
सत्प्रतिपक्षासंभवेपि व्यभिचारानुमानसंभवात्। अत एव साक्षात्प्रयत्नाधिष्ठेयजन्यत्वमपि नोपाधिः शरीरे साक्षात्प्रयत्नाधि एस: १५
ष्ठेयमित्यनियमात्। प्रयत्नेन यन्त्रिष्ठक्रिया द्वारा व्यापारद्वारा वा कार्यत्वात्। पार्थेतनस्यैव साक्षात्प्रयत्नाधिष्ठेयत्वे साधनव्या
पकत्वात् ईश्वरकृत्या परमाणुक्रिया द्वारा द्व्यणुकादिजननात्। परमाण्वादेरपि साक्षात्प्रयत्नाधिष्ठेयत्वात्। शरीरकर्तृकत्वमपि नोपा
धिः कार्यमात्रकर्तुः शरीरसहकारित्वाभावात्। नीरुजत्वावच्छिन्नं प्रति अस्मदादिकर्तृत्वेन क्लृप्तत्वादिनान्वयहेतुत्ववत्। भवतामपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वेपटादेरसिद्धसाधनमितितदपिनक्षितिपदेनसर्गाद्यकालीनोत्पलद्रव्यस्यैवधर्मित्वपत्वात्। नवाधोनवासिद्धसाधनमिति। अथात्रश
रीरजन्यत्वमुपाधिः। नेत्रक्षितिरकर्तृकाशरीराजन्यत्वादितिसत्प्रतिपक्षः। नव्यभिचारेणसाध्यव्यभिचारोवेतिनचस्वरूपासिद्धेरनेकत्वेपि
व्याप्यग्राहकप्रमयाशरीरविशेषणस्यव्यर्थत्वेनव्याप्यभावादसमर्थविशेषणत्वमितिवाच्यं। नीलधूमादेर्व्यर्थविशेषणत्वेपि
पात्रेरव्याप्यत्वात्। धूमत्वघटितव्याप्तितोनीलधूमत्वघटितव्याप्तेरन्यत्वात्। विनानीलविशेषणंतादृशव्याप्तिग्रहयोगेनतस्य
सार्थकत्वाच्च। अधिकोननिगृह्यतइतिचेत्तस्यपुरुषदोषतयापरिभाषामात्रत्वात्हेतुसनेऽभावात्। व्यतिरेकिमुद्रयाचचेष्टायांगमकत्वे
वैयर्थ्याभावाच्च। यत्रसकर्तृकत्वेनशरीरजन्यत्वमितितस्यव्यापकत्वात्। व्यतिरेकिणाअङ्कुरस्यजन्यत्वंगोकारेपिअर्थापत्तिविधयापिस
त्प्रतिपक्षादेःसंभवात्। शरीरत्वंचचेष्टाश्रयत्वंशरीरावयवत्वंवाचेष्टाश्रयश्रमः। शरीरमितिन्यायसूत्रात्। चेष्टात्वंचजीवनशरीरक्रि
याविशेषगतोजातिविशेषः। प्रयत्नजन्यतावच्छेदकः। शरीरक्रियाचेष्टाइतिआचार्येणाभाष्यव्याख्यानात्। नचमृतस्यवृक्षशरी
रेऽव्याप्तिःचेष्टास्वरूपयोग्यत्वस्यविवक्षितत्वात्॥ दंडत्वादिवद्व्ययवसंयोगादिगतएकत्वगतोवाजातिविशेषः। शरीरत्वंचेष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटादिसंतानानां खंडघटादीनां च कार्यत्वेन घटत्वादिहेतुनापि ईश्वरसिद्धेरप्रसक्तत्वात्। इति वीऽधिकारव्याख्याने निविधानाद्। तत्र आरंभकसंयो
गनाशस्य घटनादेः क्षणिकत्वापत्तिप्रसंगभिया सामान्यतोऽन्यनाशे हेतुत्वात्। स्वोपधायकतत्तत्संयोगव्यक्तिनाशस्य तत्तद्व्यक्तित्वेन तत्तद्
व्यनाशस्य हेतुत्वात्। न खंडघटप्रमाणाश्रितनिरप्युक्तं तानः खंडघटादिशंकादिकं परमाणुद्वित्वादिकमपि पक्षः। न चैकस्य पक्षत्वे अ
सत्त्वसंदिग्धानैकांतिकता सर्वसाधारणस्य पक्षतावच्छेदकस्यैकस्याभावेन पक्षातिरिक्ते व्यभिचारसंशयाऽपि वाच्यं तेषां पक्षसमत्वात्।
तदुक्तं न हि पक्षे पक्षसमे वा व्यभिचारः। पक्षसमत्वं च संदिग्धसाध्यत्वं निश्चितसाध्याभाववत्त्वं ते हेतौ वृत्तितासंशयस्यैव व्यभिचारसंशय
त्वात्। एकदानानैव वापेक्षतावच्छेदकं जन्यमात्रं वा पक्षः। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्नांशतः सिद्धसाधनं। ताव
दस्यतमस्तं सुद्बुद्धिविशेषविषयत्वं वा संदिग्धकर्तृकत्वं वा पक्षतावच्छेदकमिति। अन्ये तु अदृष्टाजनकक्षितिजन्यभिन्नं स्वजनकादृष्टाक्ष
तिजन्यभिन्नं जन्यं वा पक्षः। स्वतन्त्रपदं च गगनात्मनादावंशतः सिद्धसाधनादिवारणाय इत्यनुमानखंडं प्राहुः। विवादाध्यासितकर्तृक
त्वेन पक्षे विवादस्य सकर्तृकत्वेन मीमांसकानामिष्टेवार्थः। यत्तु क्षितित्वावच्छेदेन पक्षत्वे निश्चयबोधः। तत्सामानाधिकरणेन पक्ष

राम: १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रुः। सर्वमिदं साक्षात्परंपरासाधारणस्यजन्यत्वस्यातिरिक्तत्वमनेसंगच्छते कृतिजन्यत्वादिकं साध्यं। अन्यथा तु जन्यत्वस्य जन्यकृत्याघटितत्वात्।
सामान्यतः कार्यमात्रघटितव्यापकतायाः कृत्याघेतदवच्छेदकस्यपाकृतिरसिद्धतयासाधनायोगात्। घटादिकार्यविशेषघटितव्यापक
त्वादेः कृत्यादौ प्रसिद्धं प्रतिघटितव्यापकत्वादेरसिद्धेरप्रसिद्धविशेषस्य साध्यत्वे व्यभिचाराच्च कालिकसंबंधेन कृतिमत्यस्मिन् कालिक
संबंधेनानुमितिस्वरूपं कृतिसाध्यत्वं दृष्टान्ते घटपटवत्सिद्धं विषयतया कृतिमत्यस्मिन्समवायेन तादात्म्येन वा असंबंधत्वरूपमिकृतिसाध्यत्वं तं ने
यायिकन्येः प्रसिद्धं ईश्वरकृत्यादेः सर्वविषयकत्वात्। तथापि साध्यत्वाद्यविषयतयास्थितिः स्वाव्यवहितपूर्वकृतिकार्यत्वात्। स्वस्य
व्यवहितपूर्वकालः कृतिमान्कार्यव्यवहितपूर्वकालत्वात् कालत्वाद्ययव्यवहितपूर्वकालयत् इत्यादिकं बोध्यं। न च कार्यत्वं न कर्तृ
ज्ञानादेश्च जन्यतावच्छेदकं किंतु घटपटत्वादिकमेवेति वाच्यं। घटत्वादीनामनंतत्वेन लाघवेन जन्यत्वस्यैव कर्त्रादिकार्यतावच्छेदकत्वात्।
शरीरस्यानंतकर्तृज्ञानादेश्च कार्यतावच्छेदकं न जन्यत्वमात्रमिति चेन्न। अन्यथासिद्धतयाश्शरजन्यत्वे न जन्यत्वायोगात्। शरीरजन्यतापेक्षया
जन्यत्वस्य लघुत्वाच्च। जन्यत्वमपि नैकमिति चेन्न। तस्यानुगतस्यान्यत्वात्। घटताद्यवच्छिन्नं प्रतिकपालादिगोचरज्ञानत्वेन वाहेतुत्वेप्याघ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बोधनात् । अदृष्टद्वाराजन्यत्वेनार्थान्तरं । स्वर्गजनकजनकादृष्टजनककृतेरिन्मादिजनकत्वेबाधात् । तस्याः क्षितिजनकत्वेमानाभावात् । अन्य
थाध्वंसद्वारास्वोत्तरत्वसंबंधेनवास्वधारणानिविष्टकृतिमात्रजन्यतासिद्ध्यर्थान्तरतापत्तेईश्वरत्वात् । अदृष्टद्वारपर्य्यन्तानुधावनानौचित्यादिमा
रु: । यद्वाजन्यादृष्टोपादानगोचरत्वंजन्यत्वं । नातोदृष्टद्वारार्थान्तरता क्षितिजनकादृष्टजनककृतेः क्षित्युपादानगोचरत्वाभावात् । नचयथाकथं
चिदुपादानगोचरत्वस्यातिप्रसक्ततयाअदृष्टद्वारार्थान्तरावारकत्वात् । स्वोपादानगोचरत्वंस्वधाननुगमादननुगतमितिक्षित्युपादानगोचरत्व
स्याविपक्षेणानुमानाप्रसिद्धिर्व्यभिचारोदृष्टान्तासिद्धिरितिवाच्यं । कार्य्यमात्रावच्छिन्नंप्रतिज्ञानेच्छाकृतीनामेकार्थप्रत्यासत्त्याहेतुत्वात् । यत्रसमगवा
येनकार्य्यंतत्रविषयतयाज्ञानमिच्छाकृतिर्वेतिव्यापकताशरीरत्वाभावेस्वोपादानगोचरत्वकथनात् । इत्थंचोपादानगोचरापरोक्षज्ञानेच्छा रामः ९३
कृतिजन्यत्वसाध्यात्वेसव्यभिचारवारणायभावत्वेनवाविशेषितंकार्य्यत्वंइत्यपिचिन्तामणिप्रभृतिमतम् । यत्तुसमवायेनसंबंधावच्छिन्न
जन्यत्वस्यहेतुत्वेनव्यभिचारानवकाशात् । नादृष्टकार्य्यकारणाभावस्यचात्रोत्कल्पनर्कत्वात् । समवायसंबंधावच्छिन्नप्रागभावप्रतियोगि
त्वमेवसमवायेनकार्य्यत्वंइहकपालेसमवायेनघटोभविष्यतिनसंयोगेनेतिप्रतीतेः प्रागभावस्यापिसंबंधावच्छिन्नप्रतियोगित्वादिमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषत्वतन्मात्रेण पूर्वसमानविषयत्वा स्वर्गं प्रति यागस्य कालान्तरभाविकारणत्वे तु स्वर्गकारणता। पूर्वकारणत्वमेव च स्वर्गकारणत्वं। ननु पूर्वसंबंधेन
स्वर्गं प्रति यागस्य न व्यापकत्वं हि व्याप्तिनियामकसंबंधस्य प्रतियोगितानवच्छेदकत्वेन दूषितत्वात्। एवं च व्यापारजनकतावच्छेदकमेव तदपेक्षाम्य॰
त्वादिकं स्वनिष्ठजनकतावच्छेदकं न तु फलव्यापारो प्रति व्यापारिणोऽन्यथा हेतुत्वमिति प्राचीनमेवोक्तं साधुतरमिति ध्येयं। अयं प्रतिपूर्ववर्तित्व
ग्रहे त्वेवयं प्रतिपूर्ववर्तित्वग्रहस्यान्यथासिद्धौ फलानन्तुशतत्वेनाप्यविशेषात्। स्वर्गनियतपूर्ववर्तित्वस्य स्वर्गकारणतया स्वर्गाव्यपूर्ववर्ति
त्वमगृहीत्वा स्वर्गपूर्ववर्तित्वग्रहाभावात्। अपूर्वजनकत्वेन यागस्य स्वर्गजनकत्वात् इति। अदृष्टजनकजन्यकृत्यजन्यत्वे सति जन्यत्वं साध्यं। अजन्य
त्वांतस्य पक्षत्वे वा वृत्तिविरहेण परं जनकत्वानपायात्। व्यापकेव्यर्थविशेषणताविरहात्त्वन्यपि केचित्। समानाधिकरणादृष्टजनककृतिजन्यध्वंसा
प्रध्वंसत्वं किंतु यजेत न हिंस्यादित्यादौ यागाहिंसादेः क्रियायामेवेष्टानिष्टसाधनत्वं श्रुत्या बोध्यते। न च स्वाशास्त्रानुपपत्त्यामिति अपूर्वं वारोप्य पूर्वसा
धनत्वं यागादेस्तु ज्ञानेच्छाकृतीनामदृष्टजनकत्वं मानाभावात्। इच्छाविशेषस्य यागादेस्तथात्वेपि ज्ञानकृत्योस्तथात्वात्। कृतीष्टसाधनताबोध
स्यापि धीर्निरत्नत्वात्तान चांतुसादि तक्रियायामपि परिहार्यत्वसंबंधानपरिहितो यज्ञमवाधकत्वादीनां ज्ञानादिविशेषार्थानां स्वर्गजनकत्वस्य भक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तज्ज्ञानजन्यत्वे सति तज्जन्यत्वं ईश्वरज्ञानेजन्यसत्वे हेतुत्वेन क्षितिजनकसंयोगादावपि हेतुत्वात्। दण्डेनासिद्धेश्च कुलालादिकृतेश्चेष्टासंयोगादि
द्वारैव घटादिहेतुत्वादिति परास्तं। साक्षादव्यवहितपूर्वकालवृत्तित्वं घटितजनकतानिरूपितजन्यतायाः एव साक्षात्जन्यताशब्दार्थत्वात्।
घटादेर्दंडांतस्योगेतु चैत्रस्य घटांतेन न च तत्र व्यभिचारः। पक्षस्येपि पक्षसमत्वात्। अथाऽदृष्टद्वारा व्यवहितपूर्वकालेसत्वमप्यव्यवहितपूर्वकालस
त्वमिति चेन्न। यत्राऽदृष्टद्वाराहेतुत्वं तत्र व्यवहितपूर्वकालसत्तोऽव्यवहितपूर्वकालसत्वस्यैव निवेशात्। नहि व्यापारमात्रसत्वे घटानां व्या
पारीति प्रतीतिरनुभविकी। अदृष्टस्य दृष्टनित्यान्यत्वविरहेण तेन संबंधेन व्यापकत्वस्याप्यभावाच्च। कालिकसंबंधेन कारणतावच्छेदकव्या
पकता च न यत्र कार्यं तत्र उत्पत्तिर्वा तत्र कारणमिता कालिका पूर्ववर्तितामात्रेण हेतोरभावात्। किंतु यदा कार्योत्पत्तिस्तदव्यवहितपूर्वक्ष
णे कारणमिति या कारिका तत्र कार्यात्मनोऽव्यवहितपूर्वकालत्वस्य तेन संबंधेन कार्य्यस्यैव वा समानाधिकरणो यः कालिकसंबंधावच्छिन्ना राम: १२
भाववत्तावृत्तितेभिन्नतानवच्छेदकत्वपर्य्यवसन्नं दैशिकेन संबंधेन द्रव्यत्वादिनाऽनादिव्यापकत्वसत्वेपि न तत्पूर्वकालसत्वकालिकव्यापकतागर्भी
यं च कारणतायां न पूर्वत्तत्वमित्येतद्गर्भितो वैयर्थ्यादिति निपुणमवलोकनीयं। स्वर्गाद्युत्पत्तिअपूर्वस्य कारणतायां दैशिकव्यापकतानिवेशे कालिकवि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्म्मणो रवत्वान्न विषयतया शिष्यादिकार्य्यस्य जनकत्वमिति वैधाधिकारव्याख्याने न्यायः। नचैवं स्वर्गजनकादृष्टजनकयागादि
जनकत्वेन हेतुत्वे न स्वर्गाविषयत्ववनाशितिजनकादृष्टजनककर्म्मान्तर फलहेतेरप्युद्देश्यतया शितिविषयत्वेनादृष्टजनककर्म्मा
ऽर्थान्तरस्य दुर्वारत्वात् न च कार्य्यजनकादृष्टजनककर्म्मणो विषयतया कार्य्यादिव्यापकत्वेपि न तस्य साक्षादव्यवहितपूर्व्वकालसत्वमिति का
रा८ रणताभावाच्चास्मादृशकृतजन्मनमासाध्यानार्थान्तरमिति वाच्यं। अदृष्टद्वारेणास्मदादिकृतेः पूर्व्वसत्वघटितकारणत्वासिद्धावर्थान्तरता
पत्तेः साध्यत्वाख्यविषयतया व्यापकत्वघटितजनकत्वनिरूपितजन्यतारूपसाध्यास्यान्यत्वप्रवेशे फलेव्यभिचारात्। तस्य पक्षस
मत्वेप्यसिद्धेः॥ अत्रोच्यते। यागादेः स्वर्गजनकतायां व्यापकतानापूर्व्वसंबन्धघटिता स्वर्गस्योद्देश्यविशेष्यत्वान्नियमार्थं स्वर्गया
गयोः समवायेन प्रतियोगिवैयधिकरण्यघटितावश्यापेक्ष्यदैशिकव्यापकतासत्वेनापूर्व्वद्वारकालिकव्यापकताविवक्षणात्। किं
न्तु अव्यवहितपूर्व्वस्यन्तितायामेवापूर्व्वाप्रवेशः। तथा चापूर्व्वद्वारा फलाव्यवहितपूर्व्ववर्त्तित्वघटितजनकतायाः कृतौ सत्वेपि अत्र
साक्षात्फलाव्यवहितपूर्व्ववर्त्तित्वघटितजनकतानिरूपिताया जन्यतायाविवक्षणान्नार्थान्तरत्वमिति। एतेन साक्षात्कृतिजन्यत्वं न

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि
तिभेरसत्वात् प्रसक्तं हि प्रतिषिध्यत इति प्रवादस्तो वेदेनयध्यंसात्रैकालिकाप्र सैवनिषेधात्तन्त्वात्र पारलौवमीमांसकसिद्धांतत् तानाध्वंसं
वेधावछिन्नप्रतियोगिताकत्वमपिनात्योभावत्वं ध्वंसस्यचात्योन्याभावस्यापि संबंधप्रतियोगितावच्छेदकत्वेमानाभावात् संबंधांत
रेणप्रतियोगिनिसत्तिसंबंधांतरेणाभावप्रतीतित्वेनाभावस्य संसर्गप्रतियोगितावच्छेदकत्वं न संभवंतो। मोन्याभावप्रागभावौ वे
तिसमवायेन कपाले घटो भविष्यतीतिसंयोगेनेत्यादिप्रतीतेः प्रागभावस्यापि संबंधप्रतियोगितावच्छेदकत्वमिति चिंतनीयं। तावद्
यतेमता भावकार्यत्वं प्रतियोग्युत्पत्तिनिबंधिनियमियपिवदंति। स्वर्षसितिजनकादृष्टजनकास्यवादिकर्मासिद्धसाधनं। तज्जनकादृष्ट
जनकक्रमेनोत्पन्नजनकत्वेमानाभावात्। अन्यथातेडुलादिकर्मणामुक्तत्वात् स्वर्गजनकादृष्टजनकत्वेनरपिपाकादिजनकत्वं राम:
स्यात्तन्नकालेपिपठनिषेधकं कोतीत्यादिप्रत्ययःस्यात्। अथमाकुसिद्धसाधनमर्थान्तरता कथं निवर्त्यमिति चेत्साक्षाज्जन्यत्वस्यावि ११
लक्षणादितिगृहीतायवाज्जन्यत्वं नरस्यवहितपूर्वक्षणवृत्तित्वेन व्यापकतावत्किंतु यज्ञजन्यत्वं नाशान्यजन्यवाज्जन्यत्वं ततश्च विषय
तयाभ्रमिर्थिव्यापकस्याघटितजनकतानिरूपितजन्यतानिवेशात्स्वार्थान्तरसिद्धिजनकादृष्टजनकास्यवादिकर्मणेत्यदृष्टजनक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वेनध्वंसइतिप्रतीतिविषयत्वेनवाऽनुगमाच्च।एवमन्यताभावत्वमन्योन्याभावत्वमखण्डोपाधिः।अनुगतप्रतीतेर्बाधकंविना
ऽनुगतधर्म्मविषयत्वान्नतुसदातननसंसर्गाभावत्वमन्यताभावत्वंघटोनपटइत्यादिप्रतीतसदातनत्वघटितविषयीकरणात्।अन्य
थारूपत्वादेरपिचक्षुर्मात्रग्राह्यत्वरूपतानस्यात्।अननुगतोपाधिरनुगतप्रत्ययायोगश्चसमानः।त‒वसाधारणस्यसंसर्गाभाव
त्वस्यैवाभावाच्च।नचसंसर्गारोपजन्यप्रतीतिविषयाभावत्वंसंसर्गाभावत्वंतादात्म्येतरसंबंधघटितानां।अन्योन्याभावसाधारणमितिवाच्यं
वाच्यं।प्रतियोगिसंसर्गारोपस्यप्रतियोगितावच्छेदकसंबंधेनप्रतियोग्यारोपस्यवाऽभावधीहेतुत्वेमानाभावात्।अनाहार्यारो
पस्यप्रतिबंधकत्वात्।आहार्यारोपस्यविनेच्छामभावात्।नचनियतनिषेधस्थलेइच्छासामग्रीनतिष्ठतिइष्टसाधनत्वादिज्ञा
नविरहात्मानाभावात्।घटध्वंसप्रागभावप्रतियोगित्वावच्छेदकत्वविरहवत्।ध्वंसादेःप्रतियोगितावच्छेदकसंबंधत्वस्या
भावाच्च।एकसंबंधेनप्रतियोगिनिसतिसंबंधान्तरेणात्यन्ताभावप्रतीतेवत्ध्वंसप्रागभावप्रतीत्यभावात्।अतएवान्यो
न्याभावस्यनतादात्म्यप्रतियोगितावच्छेदकसंबंधः।प्रतियोगितावच्छेदकतावच्छेदकसंबंधस्तुनस्यवर्त्मनएवसंयोगेनवह्निम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घटो भविष्यतीतिप्रतीत्यनुपपत्तेः प्रतियोगिप्रागभावयोरेकक्षणावृत्तित्वात्। अतो वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वमे
व भविष्यत्त्वं देशकालयोरभेदोपचारादन्वयइतिवक्तव्यं तथा च वर्त्तमानकालोत्तरकालोत्पत्तिकत्वमेव भविष्यत्त्वमास्तां किं प्राग
भावेन नहि भविष्यतीतिप्रत्ययातिरिक्तः स्वातंत्र्येण इह प्रागभावइतिप्रत्ययः सचेतसां। एवं त्वं तत्सर्वत्वमपि ध्वंसपादिनामि
ति चेन्न। वर्त्तमानप्रागभावप्रतियोगित्वस्य वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वस्य वा भविष्यतीतिविषयत्वेनानुभवसिद्धत्वे
न प्रागभावस्यापलापासंभवात्। तदुक्तमाचार्य्यैः व्याख्याकौशलं हि तत् यदनुभवोपि व्याख्यायकथ्यते। इति अस्तु वानुत
त्तिमत्त्वं विनाशित्वं सदातनतायां तदभाववत्त्वं सदातनत्वभिन्नत्वं वा सकर्त्तृकत्वे लिंगं उत्पत्तेरतींद्रियतया लौकिकप्रत्यक्षाभावे
प्यलौकिकप्रत्यक्षतानपायात्। सर्वकालवृत्तेरेव सदातनत्वात्प्रागभावानंगीकारेण व्यभिचारविरहात्। अथजन्याभाव रामः १०
त्वं ध्वंसत्वं जन्यत्वं च प्रागभावप्रतियोगित्वमन्यथानिर्वक्तुमशक्यत्वात्। न प्रागभावहानिः। प्रागभावत्वं चाविनाश्यभावत्वमित्य
न्योन्याश्रयश्चेति चेन्न ध्वंसाकारानुगतमनेनत्यास्वंडोपाधिरूपत्वात् ध्वंसत्वस्य ध्वंसस्वरूपतासिद्धांतनयेपि ध्वंसपदवा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नादेरसत्वात् विनाशिशरीरस्मदादीनां शरीरायोगात्। अपरीक्ष्याऽनेऽन्या ज्ञातिजन्यत्वं वा सकर्तृकत्वं क्षितिपूर्वं ज्ञानादि सिद्धौ तदाश्रयत
यार्थेश्वरसिद्धेरप्रत्यूहत्वात्। कार्यत्वं च प्रागभावप्रतियोगित्वं न तु कृतिसाध्यत्वमिति नासिद्धिः। प्रागभावत्वं च भविष्यतीति विषयो
ऽखंडोपाधिरूपः। जन्यत्वरूपकार्यत्वमेव वा न तन्नातोऽदृष्टां न दार्ष्टांतो भयासंग्रह इति अथ भविष्यतीति प्रतीतेर्वर्त्तमानकालो
त्तरकालोत्पत्तिकत्वे विषयकत्वे नैवोपपत्तौ प्रागभावेन मानं न च भविष्यतीति प्रतीतेस्तत्प्रतिविषयकत्वमसिद्धं॥ प्रागर्थो भोगीका
रपि विनोत्पत्तिविषयत्वात् भविष्यतीति प्रतीतेः निर्वाहकत्वात्। तथाहि भविष्यत्वं यदि वर्त्तमानप्रागभावप्रतियोगित्वमुच्यते तदा घटो भविष्य
तीत्येवमादौ देशकालयोः प्रागभावेनान्वयः प्रतियोगिनो वा। आद्ये ध्वंसावच्छिन्ने भविष्यतीति धीप्रसंगः। अन्त्ये गेहे वर्त्तमानो यः
प्रागभावस्तत्प्रतियोगित्वस्य ध्वंसावच्छिन्ने घटे सत्वात्। न द्वितीयः अघभविष्यतो त्यादौ प्रतियोगिताव्यकपराभावात्। अथ स्वार्थ
मिति चेन्न तथापि गेहे भूत्वा प्रागगेहे गमिष्यति घटे अत्र प्रांगणे भविष्यतीति धीप्रसंगात् प्रांगणे हि घटे वर्त्तमानस्य प्रागभावप्र
तियोगित्व सत्वात् प्रतियोगिनि प्रागभावे चोभयत्रापि देशकालयोरन्वयो न तो नोक्तदोष इति चेन्न। तथा सम्यग्भिमत्स्यतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लास्मिन्कर्मास्मि क्षयतीति श्रुतेः। उपास्यते नेदृशितइति मीमांसकाः। ननु चार्हन्विकल्पः सर्वज्ञः इति सौगताः। दिगंबर इति दिगंबराः। लोक
व्यवहारसिद्ध इति चार्वाकाः। शिव इति शैवाः। पुरुषोत्तम इति वैष्णवाः। पितामह इति पौराणिकाः। यज्ञपुरुष इति याज्ञिकाः। सर्वदर्शी
सर्वकर्त्ता सर्वविषयकनित्यज्ञानेच्छाकृतिमानिति नैयायिकाः। वैशेषिकाश्च। तदुक्तं कुसुमांजलौ किंवहुना कुलाला अपि यं विश्वकर्मे
त्युपासते तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवदासंसारं विख्याते भगवति संशय एव नास्ति कुतस्तं निरूपणीयं। तथापि
न्यायचर्चेयमीशस्य मननव्यपदेशभाक्। उपासनैव क्रियते श्रवणानंतरागता श्रुतो हि भगवान्श्रुतिस्मृतीतिहासपुराणादिभ्य
स्तावी मंतव्यो भवति श्रोतव्यो मंतव्य इति श्रुतेः। मानाभावादीश्वर एव नास्ति नैव कथा तस्य निरस्तानादीश्वरत्व इति मीमांसकाः। तत्र प्रति
पत्तयः। आत्मत्वं जीवभिन्नवृत्तिर्वा भोविधित्वं ज्ञानादिमत्त्वं वा क्षितिः सकर्तृका न वेत्यादि। तत्र क्षितिः सकर्तृका कार्यत्वात् घटवदित्यनुमा एमः ९
नात् क्षितौ सकर्तृकत्वसिद्धौ अस्मदादिर्नकर्त्तेत्यवाधार इति अतिरिक्त कर्तृकत्वसिद्धिः। सकर्तृकत्वं च परोक्षज्ञानेच्छाकृतिमज्जन्यत्व
ज्ञानाद्यैकैकव्यतिरेके जन्यत्वं वा ज्ञानादिकं च विशेषणं। अतोऽस्मदादिज्ञानसिद्धसाधनं अर्थान्तरं वा स्थितिपर्वमस्मदादेः सत्त्वेपि नरादीनां तत्र ज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इति कापिलाचार्याः। आदिविद्वान् प्रथम मत एव विद्वान् चिद्रूपस्वभावाच्चेतनो न तु प्रकृतिवज्जडो नोपरागोपाधिसिद्धः न तु छिन्न
त्वादिवत्साध्यः। तेन कृत्स्नो नित्यो न तु प्रकृतिवत्परिणामी परिणामस्यैव तन्मात्रे साध्यत्वात्। नासतो विद्यते भावो नाभावो विद्य
ते सतः। इति सांख्यसिद्धांतात्। तेषां तु व्यक्तिविनाशो आविर्भावतिरोभावौ तौ च ताद्रूप्येण दृश्यत्वादृश्यत्वे आदौ सर्गादौ। विद्वानसि
द्धो योगसिद्धिसमुपार्जितानिमाद्यष्टसिद्धिमान् शक्तित्यार्थः। चिद्रूपस्वभावाच्चेतनस्य न तु ज्ञानवत्वेन तस्यानन्यांतरसाधारणात् स्व
ऽतिच सर्गादावादिविद्वान्न तु भवन्न कपिलो महामुनिर्धर्मविज्ञानैश्वर्यैः प्रादुर्भवेति। कापिलस्येश्वरात्मकत्वात्। सिद्धानां कपिल
श्चास्मीति भगवद्वाक्यात्। क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सः प्रदायप्रयोजकोऽनुग्राहकश्चेति पातंज
लाः। क्लेशा रागद्वेषमोहाः कारणे कार्योपचारात् कर्म धर्माधर्मौ तन्निदानं विहितनिषिद्धं यागहिंसादि। विपाकाः सुखदुःखभोगाः
फलपर्यन्तमाशेरत इत्याशया धर्माधर्माः तैरपरामृष्टोऽसंबद्धः शरीरेन्द्रियसाध्ययज्ञादिकर्मनिर्माणार्थं कायो निर्माणकायः संप्रदी
यतेऽस्मादिति व्याख्येति संप्रदायो वेदः स चानादिर्भगवताप्रयोजितो। अनुग्राहको यदादिनिर्माणशिक्षाद्वारा प्रथमतो भगवानेव कुला

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावत्वेन वा तेन प्रकृत्यर्थस्यानन्वयप्रसङ्गः॥ न चास्तु इतरत्ववन्नीमान्नत्वादिकमपेक्ष्य लघुतया शुक्लत्वनीलरूपत्वमहत्परिमाणत्वगुरुत्व
घटत्वादिजातिरेव भावप्रत्ययप्रकृत्यर्थतावच्छेदिका। आकाशत्वं नीलत्वं महत्त्वं गुरुत्वं इत्यादौ ऽन्यप्रयोगः। प्रकृत्यर्थश्चाश्रयतासंबंधे
न शब्दत्वादिविशिष्टप्रकारः घटत्वं पटत्वमित्यादौ नीलो घटत्वमित्यादिकं सर्वधारयासुत्तरभावप्रत्ययादिस्थले च यथानुभवं लक्ष
क्षणा च न न च घटत्वं पटत्वजातिप्रकारकोऽनुभवस्य प्रयोगः घटत्वं पटत्वमित्यादौ प्रकृत्यर्थतावच्छेदकस्य घटपटसंबंधादेरेव तादृशप्रे
ण त्वप्रत्ययार्थादन्यथा केऽपि नित्या घटत्वं सत्तविरोध इति वाच्यं। तत्त्वमित्यादि घटादिविशिष्टवाचकतदादिशब्दोत्तरप्रत्ययस्य
ले एवं तेनरूपेणानुभवप्रयोगात्। न च तथापि शब्दत्वनीलत्वादीनां घटत्वपटत्वादीनां चानन्तजातीनां शक्यतावच्छेदकत्वे गौरवा राम:
द्यापत्वादितरत्वादिपंचकानां तत्तत्प्रकारकानां वा शक्यतावच्छेदकत्वमेवोचितमिति वाच्यं। शब्दत्वादिकं प्रत्येकमासत्त्यविनिगमकपि ८
तायां शब्दत्वादित्वैव लाघवाधिपतिं पारिभाषिकमिति समासः॥ ॥श्री॥ यस्माज्जातं यतो लीनं निभातं चैव सर्वगं स्वपालनं। यस्मिन्न दृश्यते जगद्
यं सपाया परमेश्वरः। तत्रेश्वरः अनन्तस्वभावश्रयोपनिषदः। अद्वैतिनो धर्मी केवलः स्वप्रकाशज्ञानात्मकः। आदिविद्या नित्य

इति भावप्रत्ययार्थविचारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालवृत्त्यन्तरसंकोचेपि रक्तो घटो नीलोस्य लत्वं नास्तीति व्यवहारोपपत्तिः। न चात्र प्रकृतार्थविशिष्टत्वप्रत्ययार्थतावच्छेदकावच्छिन्नाभा
ववोधतादिति चेन्न कर्मधारयाद्युत्तरभावप्रत्ययार्थाधेयतासंबंधेन पूर्वपदार्थतावच्छेदकं तादूप्येण प्रतीयत इति सकलानुभवसिद्ध
त्वात् स्तुभवापलापप्रसंगात्। कृत्तद्धितेत्यादिपाणिन्युक्तशास्त्रव्याघाताच्च। वस्तुगत्या पूर्वपदार्थवृत्तित्वविशिष्टस्योत्तरपदार्थता
वच्छेदकस्य समभिव्याहारस्तु न मानत। प्रत्ययेऽस्तु उत्तरपदार्थतावच्छेदके पूर्वपदार्थसंबंधस्यान्वयाभावादिति लाघवादि तु पंचत्वस्तु न॰
स्तु वा भावप्रत्ययस्य शक्तिकल्पने कर्मधारयाद्युत्तरभावप्रत्यये शक्तिकल्पने कर्मधारयाद्युत्तरभावप्रत्ययस्य पूर्वपदार्थविशिष्टेस्यो
त्तरपदार्थतावच्छेदके निरूढलक्षणाभ्युपगमात्। एवं घटवत्त्वमौपगवत्वमित्यादौ तद्धितोत्तरभावप्रत्ययस्यापि पूर्वपदार्थविशिष्ट
स्योत्तरपदार्थतावच्छेदके परविशिष्टसंबंधोपगुविशिष्टापत्यत्वादौ निरूढलक्षणा· विशिष्टत्वं निरूपितत्वसंबंधेन। तथा प्रमेयत्वं प
रत्वमित्यादिकृत्प्रत्ययोत्तरभावप्रत्ययस्यापि निरूपितविषयत्वादिसंबंधेन पूर्वपदार्थप्रमाविशिष्टज्ञानादौ निरूढलक्षणा। अमग्रा
धेयतासंबंधेन प्रकृतार्थस्य भावप्रत्ययार्थे प्रकारत्वाभावेपि कर्मधारयाद्युत्तरभावप्रत्ययार्थे प्रकृतार्थ आधेयतासंबंधेन प्रकारतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यात्। अस्तु वा मतं पंचकवदवच्छेदकत्वाश्रययोरपि द्वयोः एवं शाब्दप्रमयापि ताकाङ्क्षयान घनीलेतराद्भिन्नत्वे सति नीलभिन्नान्यो-
न्याभावप्रतियोगितावच्छेदकतानवच्छेदकाश्रयसामान्येवान्वयबोधः। नीलरूपादिसत्ताचन्द्रत्वादिरूपेण शब्दप्रमयादिस्थले वा-
वच्छेदकताश्रययोर्वा रघयमन्वयः। तथा च नीलपदितराद्भिन्नत्वे सति नीलवद्भिन्नान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकाश्रया-
श्रयश्च मन्वयः। एवमवच्छेदकताश्रययोरैक्ये नान्वयः। नीलादिसत्ताचन्द्रत्वादिप्रमयोत्तरत्र प्रमयस्थलेऽन्वयः संगमनीयः।
ननु तथापि नीलोत्पलत्वगुणकर्मारोपसत्वमित्यादि कर्मधारयोत्तरभावप्रमयस्थले विशिष्टस्य नातिरिक्ततया नीलोत्पले तरा-
श्रयसमवेतत्वस्य नीलविशिष्टोत्पलत्वादौ बाधादनन्वयप्रसंगः। अथ तदितरासमवेतत्वस्य न प्रवेशः किंतु नीलाभिन्नोत्पलभिन्न-
नीलोत्पलनिष्ठान्योन्याभावप्रतियोगितावच्छेदकेतरधर्मे वाऽन्वयबोधः। तादृशेतरत्वरूपेण पूर्वपदार्थविशिष्टोत्तरपदार्थतावच्छे- राम:
दकमेव कर्मधारयोत्तरभावप्रमययोर्बोधयति। नामदिति समभिव्याहारस्थले तत्वबद्धत्वनीलोत्पलत्वविशिष्टद्रव्यत्वादेरप्रमयः
तादृशस्थले प्रकृत्यर्थभिन्नत्वस्यापि पृथक्त्वप्रमयार्थप्रकारतया नानाभ्युपगमादिवाच्चयितावच्छेदकावच्छिन्नप्रतियोगिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मे

घटत्वत्वादिघटकतया कथंरूपेण सर्वत्र शक्तिरिति वाच्यं। सामान्यतो वर्त्तमानत्वावच्छेदकतयोरेव शक्यतावच्छेदकत्वात्। येन संबंधेन प्रकृ
त्यर्थतावच्छेदकस्याभानं तन्नतत्संबंधावच्छिन्नत्वस्य प्रतियोगिताकाभाववृत्तेः स्वरूपतः संसर्गतयाभानाभ्युपगमेन घटत्वादौ बाधकाभावा
त्। तन्नतत्समभिव्याहारस्य नियामकत्वाच्च नातिप्रसंगः। न चैवं घटेतरसमवेतत्वादिरूपेण घटेतरसमवेतत्वादेर्घटत्वादिघटकतया घटत्व
त्वादिप्रकारकानुभवापलापापत्तिः। तदपेक्ष्य तद्धर्मान्तररूपेण शक्तिपक्षस्य सम्यक्त्वादिति वाच्यं। तदनुरोधेन सामान्यतो घटेतरावृत्तित्वत्वा
दिनार्थघटेतरावृत्तित्वादेरेव घटत्वत्वादिघटकत्वात्। समवेतत्वाद्यवच्छिन्नत्वस्य प्रतियोगितार्थेतरवृत्तेः स्वरूपतः संसर्गतया घटकत्वादे
वघटत्वत्वादौ बाधकाभावात्। न चैवं तरादीनां पंचानामेकाकत्वे नीलत्वं गुरुत्वमित्यादौ नीलरूपमहत्परिमाणादेः प्रतिव्यक्तिभिन्नतया
कुत्रापि नीलरूपमहत्परिमाणादौ नीलमहदादिनिष्ठाभावप्रतियोगितानवच्छेदकत्वस्यासत्वात्। अनन्वयप्रसंगः। एवं तत्वमि
त्यादौ घटत्वादिनानाव्यक्तिसत्वात् कतरत्तदिशक्तोत्तरभावप्रमययस्य तेष्यनन्वयप्रसंग इति वाच्यं। तत्र विशेष्यदलस्याप्रवेशात्। किं
तु केवलं नीलेतरावृत्तित्वादिप्रकारेणैवान्वयबोधात्। प्रकृत्यर्थतावच्छेदकत्वमात्रबोधकत्वकल्पनयैव नीलरूपाद्यतिरिक्तस्य नतेनोऽप्र॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यैवसंसर्गांशकत्वात्। अन्येतु घटत्वत्वपटत्वत्वाद्यनंतशक्यतावच्छेदककल्पने घटत्वादिघटकीभूतवैशिष्ट्यानां शक्तिविषयत्वकल्पने गौ
रवात् लाघवेन सर्वत्रैव तद्घटितमानमन्योन्याभावप्रतियोगितानवच्छेदकं च विशकलितानि पंचैवाकाशानि। एवकारव्युत्पत्तिवैचित्र्या
त्रैकपदार्थस्यापि परस्परमन्वयबोधः। इतरान्योन्याभावपदोत्तरवाक्यमन्वयः प्रकृतिपदात्तत्पदादेर्लाभः। तथा च घटत्वमाकाशत्व
नानात्वमित्यादौ सर्वत्रैव प्रकृतिप्रत्ययाभ्यां मिलित्वा घटेतरत्वेतरत्वमानभिन्नत्वे सति घटनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकेतरदिसाद्यैर्वा
क्यबोधः। ननु प्रकृत्यर्थघटादिसन्निकृष्टस्यापि भावेन तत्वासमेतत्वादीनां पृथगंतर्भावः। पृथक्तत्त्वज्ञानस्यानन्वयासिद्धत्वात्। नैवं घटत्वमित्या
दावव्यवहितादेराकाशत्वमित्यादावाकाशैकत्वादेश्च बोधापत्तिस्तस्यापि तादृशानवच्छेदकेतरत्वादिति वाच्यं तादृशानवच्छेदकेतरत्वरूपेण रामः
प्रकृत्यर्थव्यवच्छेदकमेव बोधयतीत्यन्वयव्यतिरेकाभ्यामभिव्याहारव्युत्पत्तेर्ध्वंसांतरविशेषाभावान्न चैवं सम्यक्तमपि समवतामितिवाच्यं। तत्प्रकारक ६
बोधस्यानुभवसिद्धत्वात्। सन्ने तत्र सन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकेतरत्वेनैवान्वयः। सदितरान्तर्निष्ठस्याप्रसिद्धत्वादेवाभा
वात्। प्रकृत्यर्थतावच्छेदकबोधकमात्रव्युत्पत्तेराकाशाभावादेरिताप्रत्ययः। न च तथापि तन्नत्वं यत्र यावत्तत्त्वव्यापकत्वावच्छेदकत्वयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रुटितेस्यादिपाणिनिसूत्रेपि समासत्वले संबंधपदं पदार्थतावच्छेदकद्वयसामानाधिकरण्यपरं। एवं च नीलोत्पलत्वमित्या-
दौ नीलाभिन्नोत्पलनिष्ठ यो नीलत्वोत्पलत्वयोः सामानाधिकरण्यमित्यन्वयः। निष्ठता संसर्गः। एवमग्रेपि। भावप्रत्ययार्थैकदेशेपि
प्रकृत्यर्थान्वयो व्युत्पत्तिवैचित्र्यात्। नीलाभिन्नोत्पलनिष्ठं नीलत्वोत्पलत्वयोः सामानाधिकरण्यमिति वान्वयः। निष्ठत्वं चात्र तयोः
सामानाधिकरण्यमिति प्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः। न च सामान्यतः सामानाधिकरण्यत्वेन सामानाधिकरण्यमेवार्थो
स्तु किंतु पदार्थतावच्छेदकप्रवेशेनेति वाच्यं। तथा सति नीलोत्पलत्वमित्यादौ नीलोत्पलत्वयोः सामानाधिकरण्यालाभादितरविशेष
णतेनोपस्थितस्य पदार्थतावच्छेदकद्वयस्य सामानाधिकरण्यविशेषणत्वेनान्वयायोगात्। समस्यमानपदस्य नीलत्वोत्पलत्वयोर्ल
क्षणायां नीलोत्पलपदादभेदानुभवापत्ता पादियाऽः। तदुभयमप्यसत् गौरवात् नीलोत्पलत्व उत्पलसमवेतमिति वाक्यस्यायोग्यत्व
प्रसंगात्। नीलोत्पलत्वमुत्पलत्वे इति वाक्यस्यायोग्यत्वप्रसंगाच्च। कृत्रुटितेस्यादिपाणिनिसूत्रविरोधप्रसंगाच्च। तच्च कृदादिसकलसा
धारणत्या संबंधावगमपदार्थतावच्छेदके पूर्वपदार्थसंबंधावगमपरस्योत्तरपदार्थतावच्छेदके पूर्वपदार्थसंबंधावगमपरत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वच्छिन्नत्वं चरमपर्याप्तत्वं वा महत्त्वगुरुत्वं नीलत्वमित्यादौ महत्त्वगुरुत्वनीलत्वादिजातिप्रकारेण महत्त्वगुरुत्वनीलरूपादिकमेवा
र्थः इत्यादिकं स्वयमूह्यं। कर्मधारयादिसमासोत्तरभावप्रत्ययस्य चाधेयतासंबंधेन पूर्वपदार्थविशिष्टमुत्तरपदार्थतावच्छेदकमर्थः। न
जातिरूपगुणे तथा त्तरभावप्रत्ययस्य विषयत्वादिसंबंधेन पूर्वपदार्थविशिष्टमुत्तरपदार्थतावच्छेदकं। मतुबादितद्धितोत्तरभावप्रत्ययस्य
तु निरूपितत्वादिसंबंधेन पूर्वपदार्थविशिष्टमुत्तरपदार्थतावच्छेदकमर्थः। कृत्तद्धितेत्यादिसूत्रे संबंधावगमपदस्य समानस्थले
यथोत्तरपदार्थतावच्छेदकसंबंधाधिकरणत्वमपरपदार्थतावच्छेदकसामानाधिकरण्यसंबंधेनैकपदार्थतावच्छेदकसंबंधवानःप
रपदार्थतावच्छेदकसंबंधो वार्थः। कृत्तद्धितेत्यादिसूत्रे संबंधावगमपदस्य समासस्थले यथोक्तापरपदार्थतावच्छेदकसंबंधपर राम: ५
त्वात्। नीलोत्पलत्वमित्यादौ नीलाभिन्नोत्पलवृत्तिनीलसंबंधाधिकरणोत्पलत्वे संबंधद्वयाकारको। नीलाभिन्नोत्पलवृत्तिनीलत्व
संबंधसामानाधिकरण्यसंबंधेन नीलत्वसंबंधउत्पलत्वसंबंधद्वयाकारतो वान्वयबोधः स्यात्। केचित्तु कर्मधारयादिसमासोत्त
रभावप्रत्ययस्य तत्तत्पदार्थतावच्छेदकद्वयसामानाधिकरण्यत्वेन समस्यमानपदार्थतावच्छेदकद्वयसामानाधिकरण्यमर्थः। कृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वपि प्रमेयत्वादिरूपेण प्रमेयत्वादिकमेवार्थः। तथैवानुभवात्। प्रमेयत्वत्वं च प्रमानिरूपितविषयत्वत्वं विषयता च स्वरूपसंबंधविशे
षोऽपि व्याख्यातं। आकाशत्वमित्यत्राप्याऽऽकाशत्वेनाऽऽकाशत्वमेवार्थः। तथैवानुभवात् आकाशत्वत्वं च शब्दत्वेनत्वाकाशतासमवे
तत्वे सत्याकाशनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वे च सति समवेतत्वं। आकाशस्यैकत्वादावतिव्याप्तेः। कालत्वदिक्त्वमित्यत्रापि का
लत्वदिक्त्वत्वरूपेण कालत्वदिक्त्वमेवार्थस्तथैवानुभवात् कालत्वत्वं दिक्त्वत्वं च कालत्वादिघटितस्वरूपसंबंधविशेषः। ननु का
लेतरासमवेतत्वे सति नित्यादिकं कालत्वादिप्रकारकप्रमाविशेष्यत्वादावपि व्याप्तेः। आत्मत्वं मनस्त्वमित्यत्राप्याऽऽत्मत्वमनस्त्वमे
वार्थः। आत्मत्वत्वं मनस्त्वत्वं चात्ममनोभिन्नासमवेतत्वे सति आत्ममनोनिष्ठान्योन्याभावीयपर्याप्तिविशेषावच्छिन्नप्रतियोगितावच्छे
दकताश्रयत्वे च सति समवायेन पर्याप्तत्वं सकलात्ममनोवृत्तिद्वित्वेऽतिव्याप्तिवारणाय पर्याप्तिविशेषावच्छिन्नत्वेत्यवच्छेदकताविशेषणं
चरमपर्याप्तत्वोपादानाज्ज्ञानादेः पर्याप्त्यनभ्युपगमेऽपि न तत्रातिव्याप्तिः। ज्ञानेऽनु पर्याप्तिरूपेयत। एवं तेन नासंभवः। यद्वा च पर्या
प्त्याख्यसंबंधो नांगीक्रियत एव समवायसंबंधेन द्वित्ववतोऽन्योन्याभावोऽप्येकः स्वीक्रियते। तदा नोपादेयमेव पर्याप्तिविशेषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावप्रतियोगितानवच्छेदकत्वादिरूपेण प्रकृतसमर्थतावच्छेदकमेव बोधयति नान्यदिति समभिव्याहृतप्रत्यासमवेतत्वसंबंधेनैवप्र
कृतसमर्थस्य घटादेस्तत्पदार्थेऽन्वय इति युक्तं स्येवाऽभावादेर्वारणासंभवात्। किं समवेतत्वस्य शक्यतावच्छेदकांतर्भावे नेति वाच्यं। अभा
वासवृत्तित्वाप्तिवारणाय तस्य घटत्वादिघटघटितत्वावश्यकतया शक्यतावच्छेदकेपि तदंतर्भावस्यावश्यकत्वादन्यथा घटत्वमि
त्यादौ घटत्वत्वादिप्रकारकबोधस्य सर्वानुभवसिद्धस्यापलापापत्तेः न च तादृशानुभवोऽसिद्ध इति वाच्यं। तथा सति सम्यंतरलस्या
पि व्यर्थत्वापत्तेः। लाघवाद्धर्मत्वरूपेण शक्तिपक्षस्यैवोचितत्वापत्तेश्च। यदि च घटत्वं तद्विविधं एकं घटेतरभेदानुव्यापकत्वं अ
परं च घटत्वव्यवहारविषयतावच्छेदकत्वं। तत्राद्येऽभावोसिद्धवारणाय समवेतत्वांतर्भावस्यावश्यकत्वेपि द्वितीये तदंतर्भावे मा-
नाभावः। उक्तयुक्त्यैवाभावासावपि प्रसंगविरहात्। तच्च केवलघटेतरासमवेतत्वादेव प्रकारकत्वस्यानुभवसिद्धत्वादिति विभा राम: ४
वितेन तदांतर्भावनीयं। शक्यतावच्छेदकमपि तदेवमेवमग्रेपि सर्वं बोध्यं। सत्तेत्यत्र च सत्तात्वरूपेण सत्तैवार्थः। सत्तात्वं तु सन्निष्ठा-
योग्याभावप्रतियोगितानवच्छेदकत्वे सति समवेतत्वमात्रं। न तु तदितरासमवेतत्वस्य प्रवेशो व्यर्थत्वादप्रसिद्धत्वाच्च। प्रमेयत्वमित्यादा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृतिप्रत्ययाभ्यामन्वयबोधः। तथा घटत्वमौपगवत्वमित्यादितद्धितेन त्वभावप्रत्ययस्यापि निरूपितत्वादिसंबंधेन पूर्वपदार्थविशिष्ट उत्तरपदार्थतावच्छेदके निरूढलक्षणा। घटसंबंधिवृत्ति घटविशिष्टः संबंधः उपगुपत्यक्षमूपगुविशिष्टमपत्यत्वमित्यादिरेव प्रकृतिप्रत्ययाभ्यामन्वयबोधः कृत्तद्धितेभ्यः समं भावगमो भावप्रत्ययेनेति पाणिनिसूत्रात् अमत्वापरपदार्थतावच्छेदके संबंधागमः पूर्वपदार्थस्य संबंधावगमश्चेति तदर्थादित्याहुः। तदसत् अनुभवापलापात्। घटत्वं पटत्वमित्यादौ घटत्वत्वरूपेण बोधस्यैव सर्वानुभवसिद्धत्वात्। कस्यचिद्धर्मेण प्रकारकबोधस्य त्वेपितस्य सार्वसिकत्वात्। तथैवानुभवात्। सांप्रदायिकास्तु। तत्त्वादिभावप्रत्ययानामर्थः प्रत्येकघटत्वत्वपटत्वत्वादिकमेव तस्य शक्यतावच्छेदकं। प्रामाणिकगौरवस्यादोषत्वात्। घटत्वं पटत्वमित्यत्र घटवृत्ति घटत्वं पटवृत्ति पटत्वमित्येव प्रकृतिप्रत्ययाभ्यामन्वयबोधः एवं सर्वत्रैव प्रकृत्यर्थवृत्तित्वस्य संसर्गमर्यादया त्वपदार्थे भानं पर्यवसन्नं। पदसमभिव्याहारस्य प्रत्ययनियामकतात्र घटवृत्ति घटत्वमित्यादौ न पटत्वादिबोधः। घटत्वत्वं च घटेतरासमवेतत्वे सति घटनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वे च सति समवेतत्वं स्वं पटत्वत्वादिकमपि निर्वाच्यं। अभावादावतिप्रसंगवारणाय समवेतत्वोपादानं। न च घटेतरासमवेतत्वे सति सकलघटनिष्ठात्यन्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटत्वादिरूपप्रकृत्यर्थतावच्छेदकधर्ममात्रप्रतियोगिकाभावस्य बोधयितुमशक्यत्वात् इति वाच्यं नञ्तलादिभावप्रत्ययसमभिव्याहृतन,
ञाप्रकृत्यर्थतावच्छेदकविशिष्टधर्मत्वावच्छिन्नप्रतियोगिताकाभावो बोध्यते इति व्युत्पत्त्या व्यवहारोपपत्तेः नीलोत्पलत्वं राजपुरुषत्व
मित्यादिसमासस्थलेपि धर्मस्वरूपेणाप्रकृत्यर्थतावच्छेदकमुत्पलत्वपुरुषत्वादिकमेव भावप्रत्ययो बोधयति। नीलाभिन्नोत्पल
वृत्तिधर्म्मः। राजसंबंधिपुरुषवृत्तिधर्म्म इत्यादिरेव प्रकृतिप्रत्ययाभ्यां समन्वयबोधः। न चैवं रक्तोत्पलादावपि नीलोत्पलत्वा
दिव्यवहारापत्तिः। प्रकृत्यर्थतावच्छेदकीभूतोत्पलत्वादेरत्रापि सत्त्वात् इति वाच्यं। कर्मधारयबहुव्रीहितत्पुरुषादावुत्तरभावप्रत्ययसमभिव्या
हृतप्रत्ययादेः प्रकृत्यर्थतापन्नविशिष्टधर्मत्वावच्छिन्ननिरूपितसंबंधितावोधकतया तथा व्यवहारापरिहारात्। वस्तुतस्तु कर्मधारया
दिसमासोत्तरभावप्रत्ययस्याधेयतासंबंधेन पूर्वपदार्थतावच्छेदकविशिष्टउत्तरपदार्थतावच्छेदके निरूढलक्षणा। एवं च नीलोत्प
लत्वमित्यादौ नीलाभिन्नोत्पलवृत्ति नीलविशिष्टमुत्पलत्वमित्यादिरेव प्रकृतिप्रत्ययाभ्यां समन्वयबोधः एवं पङ्कजं भोक्तव्यमित्यादि
तत्पुरुषोत्तरभावप्रत्ययस्यापि विषयित्वादिसंबंधेन पूर्वपदार्थतावच्छेदके निरूढलक्षणा पाककर्तृवृत्तिपाकविशिष्टाकृतिरित्येव

रामः
२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयदुःखजनकज्ञानसमवधानदशायां सुखत्वादिप्रकारेण सुखादिविषयापत्तिः। सुखदुःखाभावयोर्द्वेषस्वरूपयोग्यतया कार्य्यसहवर्त्तित्वेन
बलवद्द्वेषस्यात्र प्रतिबन्धकत्वासंभवादिति वाच्यं। इष्टत्वात्। प्राचीनैरपि बलवद्द्वेषविषयदुःखजनकज्ञानस्योपायेच्छां प्रति हेतु-
त्वाभ्युपगमेन सुखत्वाप्रकारकेच्छाया इष्टत्वात्। सामान्यतो विशेष्यतावच्छेदकताप्रत्यासत्त्या बलवदिष्टसाधनताज्ञानस्य बलवद्द्वे-
षप्रतिहतत्वेन ननु सुखदुःखाभावयोरपि बलवद्द्वेषसंभवाच्चेति प्राहुः। केचित्तु बलवद्द्वेषोपि न प्रतिबन्धकः॥ ॥श्रीः॥ ननु त्वत्तादि-
भावप्रत्ययस्य केन रूपेण शक्तिरिति चेदत्र प्राञ्चः। धर्म्मत्वरूपेण धर्म्म एव तस्य शक्तिः लाघवात्। धर्म्मत्वमाधेयत्वं। शक्ततावच्छेद-
कं च प्रत्येकं त्वतलादिकमेव। ननु सामान्यतो भावप्रत्ययत्वं अनुगतस्य तस्य दुर्वलत्वात्। तेन रूपेण ज्ञानेपि त्वत्वप्रकारकं ज्ञाना-
ज्ञाद्बोधोदयाच्च। घटत्वं पटत्वमित्यादौ घटवृत्तिधर्म्मः पटवृत्तिधर्म्म इत्याद्येव प्रकृतिप्रत्ययाभ्यामन्वयबोधः। धर्म्मत्वरूपेण
प्रकृत्यर्थतावच्छेदकधर्म्ममात्रबोधकत्वमुपगम्यैव घटत्वं पटत्वमित्यादिरूपधर्म्मविशेषमात्रलाभः। नचैवं पटेपि घटत्वं नास्ती-
तिव्यवहारविरोधः घटवृत्तिधर्म्मस्य [illegible]त्वादेस्तत्र सत्त्वात्। अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य व्युत्पत्तिबलल्लभ्यतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्थापितया चतुर्थक्षणोत्पत्त्यावारणाय तद्धेतुत्वमावश्यकमेवेति वाच्यं। नत्रैक्षणोत्पत्त्यादिसाक्षात्कारोत्पत्त्यात्पेक्षाबुद्धेः क्षणावस्थाव
स्थापित्वासंभवात्। नच तत्पापित्वगमत्वस्वरूपावच्छेदकीभूततनोरकसाधनत्वविषयकसमूहालंबनज्ञानं तत्रैवोत्पत्त्यावारणाय तद्धेतुत्व
मावश्यकमितिवाच्यं। द्वेषाछुपायोगपद्याभावात्। नच यत्किंचित्गीयक्षणोत्पत्तिमादेसाक्षात्कारोत्पत्त्यादेपितदुपधायकापेक्षाबुद्धेः क्षणा
वयावस्थापित्वं द्वेषाछुपायोगपद्यं वा सुपपन्नमेवेति तदा तद्धेतुत्वमावश्यकमितिवाच्यं। तस्य हेतुत्वे मानाभावात्। किंतु तादृशस्वत्वविशे
षीयसमूहालंबनप्रत्यक्षरेवधुस्वजनकतत्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताप्रत्यासत्त्या प्रकारतासंबंधेन तत्तदुत्पत्तीयस्वत्वा
त्वावच्छिन्नं प्रतिप्रतिबंधकता। एकस्मिन्नेव काले समनियतानन्तुकालोपाधिसत्वात्। विनिगमनाविरहेण प्रतिपुरुषं प्रतिपुरुषं का गमः २
लोपाधिभेदात्। गुरुतरानंतकार्यकारणभावकल्पनापेक्षया कतिपयज्ञानपत्नीनां तत्तद्व्यक्तित्वेन प्रतिबंधकताकल्पनानस्थत्वात् इत्याहुः॥
अन्ये तु तादृशस्वत्वविशेषे इच्छावारणाय लाघवात् समानप्रकारताप्रत्यासत्त्या बलवद्द्वेषएव कार्यसहवर्तित्वेन इच्छाप्रतिबंधकः। फ
लेगोचरे बलवद्द्वेषविषयसाधनताज्ञानयोः सत्वोपायगोचरबलवद्द्वेषस्यावश्यकतया तान्नैवं सुखादौ तु स्वत्वादिप्रकारककल्पक्षा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्यं। अथ सिद्ध्यन्नमात्रत्वात् नवापि शब्दसमवाय्यधिकरणतया कृती -- नानेष्वअवं न क्षणोत्पद्यसंबंधस्य कल्पनीयतया महत्त्वौरवमिति
वाच्यं। एतेनात्मा शब्दस्य मानसतापत्या मात्मजीवात्मभिः सर्वविनिगमनाविरहस्तथापि प्रमेक मनो व्यक्तिमादाय विनिगमनाविरहो दुर्वारः।
न च मनसः शब्दसमवायित्वे मनो दण्डाभिघातादिरेकाव्याप्त समवायिकारणं स्यात् तस्य न संभवति। न च मनसोविभुत्वाभावेन तेषां
दण्डाभिघातासंभवात्। भेर्य्याः सन्निधौ नियमतो मनःसत्त्वमानाभावादिति वाच्यं। भावकार्य्याणां समवायिकारणकत्वस्याप्रयोज
कतया शब्दस्यासमवायिकारणानभ्युपगमेऽपि क्षतिविरहात्। निमित्तपवनदण्डसंयोगभेरीदण्डाभिघातादिः देनिमित्तकार
णविषयेऽत्यत्र तत्कालपदमिष्ठादि पूर्वक्षणात्मकस्य तत्कालपदं न तथा च देवसाध्य वाहितपूर्वमसत्त्वेऽपि न क्षतिरिति वाच्यं।
तस्य हेतुत्वे मानाभावात्। वलवद्द्वेषनाशक्षणे बाधकाभावेनेष्टापत्तेः स्वीकारात्। अन्यथा वलवद्द्वेषनाशसत्त्वे चतुःप
ञ्चक्षणानन्तरमपि नेच्छाभावनाशस्यापि सुवचत्वात्। विशिष्यक्षणनियमस्य सर्वत्र साम्प्रशति। न च तथापि यन्नायाधव पेक्षया सु
खात्मकं नरकसाधनसुखसाधनत्वविषयकं समूहालंबनं ज्ञानं ततः क्रमेण नरकबलवत्त्वबलेच्छ तेच्छे तत्रापेक्षावुद्धेः क्षणत्रया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योग्यविशेषविशेषगुणत्वस्य संस्कारव्याप्यत्वात् । अन्यथा संस्कारादेरपि क्षणद्वयमात्रावस्थायित्वापत्तेः । अथात्मसमवेतमानसं द्विविधं
जातिमानसं आत्मविशेषगुणमानसं द्विविध जाति चैतन्न तावदाद्यस्य नात्र संभवः जातिप्रत्यक्षं प्रति जातित्वेन कारणत्वात् · तादृशका
र्यकारणाभावस्य चक्षुःसंयुक्तसमवायादेः सन्निकर्षानंगीकर्तॄणां स्वतंत्राणां मते धर्माधर्मादीनां मानसप्रत्यक्षं प्रति प्रतिबंधकत्वानं
गीकर्तॄणां न्यायानां नये चावश्यकत्वात् । न्यायमतेऽयं हि गुणमानसावसरे स्व प्रपंचितं । नापि द्वितीयस्यात्र संभवः । धर्माधर्मादीनां मानसप्रत्य
क्षं प्रतिबंधकत्वानंगीकर्तृनये आत्मविशेषगुणमानसं प्रति ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नमात्रवृत्ति योग्यात्मविशेषगुणत्वस्यैकजातिम
त्वेन निरुक्तयातादात्म्यसंबंधेन कारणत्वात् । तदपि तत्रैव प्रपंचितं । न च तथापि शक्तवृत्तिजातेर्मानसप्रत्यक्षं दुर्वारमिति वाच्यं । धर्मत्वादि
जातीनां मानसवारणाय समवेतमानसं प्रति समवेतत्वसंबंधेन निरुक्तयोग्यत्वाविशेषगुणस्य मनःसंयुक्तसमवेतसमवायस्य सन्निकर्ष
त्वानंगीकर्तॄणां न्यायानां नये जातिमानसंप्रत्यक्षमानसस्य वाऽहेतुत्वादिति चेदेवं विषयतासंबंधेन गवदात्मवृत्तीवात्मनामपि शावस
मवायित्वस्य दृष्टत्वात् । नचैवं अनेनात्र यत्किंचिज्ज्ञानाधारत्वकल्पनामपेक्ष्य निखिलशब्दाधारतयैकव्यक्तिकल्पने नैव लघीयसीतिवा

राम: १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं० ४२०७ दण्डघटकारणताविचारः। गदाधरः॥

श्रीः॥ अथ शब्दोऽव्याप्तिनो गुणत्वात् भावकार्यत्वात् इत्यनुमानादेव पृथिव्यादिबाधेन अतिरिक्ताकाशसिद्धिरिति चेन्न अत्र भट्टाचा
र्यानुयायिनः। तदनुमानेन प्रमाणानां रक्षितत्वात् यावदात्मन एव शब्दसमवायित्वसिद्धेरतिरिक्तव्योमकल्पने मानाभावाद्गौरवाच्च। श्रो
त्रमपि कर्णशष्कुलीविवरावच्छिन्नभगवदात्मैव केवलं शष्कुलीविवरमेव वा अवच्छिन्नतासंबंधेन शब्दग्राहकत्वात्। असमवायसन्निकर्षे
ण शब्दग्रहस्येति प्रवादस्याग्राह्यत्वात्। न च भगवदात्मनो वा शब्दसमवायित्वं जीवात्मनो वा शब्दस्य विनिगमनाविरहः। जीवात्मनानात्वेपि
प्रत्येकमादाय विनिगमनाविरहस्य दुर्वारत्वादिति वाच्यं। जीवात्मनां शब्दाधारत्वे अहं सुखी अहं दुःखीत्यादिमानसलौकिकप्रत्यक्षवदहं शब्दव
नापि अतिरिक्तप्रतिबंधकत्वकल्पनापत्तेः। न च संस्कार वानित्यपि मानसलौकिकप्रत्यक्षं स्यात्। इत्यपि प्रसंगस्यैव विनिगमकत्वात्। भा
वनाद्यादिवत्। शब्दस्यापि अयोग्यत्वकल्पने मानसप्रत्यक्षं प्रति शब्दत्वेनापि अतिरिक्तप्रतिबंधकत्वकल्पनापत्तेः। न च संस्कारादेरपि निषेधमानस
प्रतिबंधकतावच्छेदकवैजात्यमेव शब्दसाधारणं कल्प्यत इति नातिरिक्तप्रतिबंधकत्वकल्पनमिति वाच्यं। तथापि अनंतशब्देभ्यो वैजात्याकार
ताकल्पनगौरवस्य दुर्वारत्वात्। तद्वैजात्यस्य शब्दनिष्ठत्वेन नास्ति नाशकतावच्छेदकयोग्यविभुविशेषगुणत्वमादाय सांकर्यप्रसंगाच्च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu